श्री:

विशिष्टाद्वैतदर्शने जगत् प्रति ब्रह्मणो अभिन्ननिमित्तोपादानकारणत्वप्रतिपादनम्

शोधच्छात्र:

ए. नरसिंहन्

मार्गदर्शक:

श्रीनिवास वरखेडि

आचार्य:, तथा शास्त्रविभागाध्यक्ष:

कर्नाटकसंस्कृतविश्वविद्यालयस्य विशिष्टाचार्य (एम्.फिल्) उपाधिप्राप्त्यर्थं समर्प्यमाण: शोधप्रबन्ध:

कर्नाटकसंस्कृतविश्वविद्यालय:, पम्पमहाकविमार्ग:, चामराजपेटे, बेङ्गलूरु –५६००१८

श्रीः

विशिष्टाद्वैतदर्शने जगत् प्रति ब्रह्मणो अभिन्ननिमित्तोपादानकारणत्वप्रतिपादनम्

विषयसूचनी

१.० भूमिका..... 7

२.० विशिष्टाद्वैतदर्शनं तस्य प्रवर्तनकाराश्च..... 9

३.० विशिष्टाद्वैतदर्शनस्य प्रधानांशाः..... 12

४.० प्रबन्धस्य विषयः प्रयोजनं च..... 15

५.० कारणत्वसम्बन्धिनः केचन सिद्धान्ताः..... 17

५.१ कारणतावादाः.....17

५.१.१ साङ्ख्यमतोक्तसत्कार्यवादसङ्ग्रहः.....17

५.१.२ न्यायदर्शने कार्यकारणवादस्य निरूपणम्.....18

५.१.३ विशिष्टाद्वैतमते सत्कार्यवादनिरूपणम्.....18

५.२ उपादानस्य लक्षणम्.....19

५.३ उपादनोपादेययोरभेद: सङ्गच्छते.....20

५.४ उपादाननिमित्तत्वयोरेकनिष्ठत्वम्.....20

६.० जगत्सृष्टिरहस्यम्.....22

७.० ब्रह्मणो अभिन्ननिमित्तोपादानत्वस्य निरूपणम्.....26

८.० ब्रह्मणो अभिन्ननिमित्तोपादानत्वे सिद्धान्तोक्ता: प्रधानांशा:, तेषाम् आक्षेपपरिहारौ च.....30

८.१ ईश्वर एव उपादानं जगत:, न प्रकृति: 30

८.१.१ आक्षेप: - उपादानस्य विकारावश्यम्भावित्वात् प्रकृतिरेव उपादानं जगत:, न ईश्वर:.....30

८.१.२ परिहार: - ब्रह्मण उपादानत्वे न विकारापत्ति: 31

८.२ ईश्वर एव जगत: निमित्तकारणमुपादानकारणमपि.....36

८.२.१ आक्षेप: - एकस्यैव निमित्तत्वमुपादानत्वं च न सम्भवति 36

८.२.२ परिहार: - ब्रह्मण एव उपादानत्वनिमित्तत्वे सम्भवत:.....37

८.३ अत्यन्तविलक्षणस्य जगतोऽपि ब्रह्मण उपादानत्वसम्भव: 41

८.३.१ आक्षेप: - उपादानोपादेययो: सालक्षण्यनियमात् त्रिगुणात्मकस्य जगत ईश्वर: नोपादानं भवितुमर्हति ..41

८.३.२ परिहार: - त्रिगुणात्मकजगत् प्रति ब्रह्मण उपादानत्वसमर्थनम्.....42

८.४ प्रकृतिपुरुषयो: नित्ययो: ब्रह्मोपादानकत्वम्..... 44

८.४.१ आक्षेप: - नित्यवस्तुन उपादेयत्वासम्भव: 44

८.४.२ परिहार: - नित्ययो: प्रकृतिपुरुषयोरुपादेयत्वसमर्थनम् 44

८.५ समष्टिसृष्टेरपि ईश्वर एव उपादानम्..... 47

८.५.१ आक्षेप: - तत्वानां सृष्टौ विशेष्यभूतस्य ईश्वरस्य उपादानत्वासम्भव:.....47

८.५.२ परिहार: - तत्वानां सृष्टौ विशेष्यभूतस्य ईश्वरस्य उपादानत्वसमर्थनम्.....48

८.६ विशिष्टस्यापि ईश्वरस्य उपादानत्वं मुख्यम्; न स्वरूपहानि:..... 50

८.६.१ आक्षेप: - विशिष्टवेषेण ईश्वरस्य उपादानममुख्यं भवति, मुख्यं चेत् विकारापत्ति:.....50

८.६.२ परिहार: - विशिष्टवेषेणापि ईश्वरस्य उपादानममुख्यं न भवति, न विकारापत्तिश्च.....51

८.७ चिदचिद्द्रव्ययो: परमात्मप्रकारतैकस्वभावत्वम्..... 52

८.७.१ आक्षेप: - चिदचिद्द्रव्ययो: परमात्माख्यद्रव्येण सहोपलम्भनियमाभावात् जातिगुणवत् न परमात्मप्रकारतैकस्वभावत्वम्.....52

८.७.२ परिहार: - चिदचिद्द्रव्ययो: परमात्मन: प्रकारतैकस्वभावत्वमुपपद्यते.....53

८.८ ईश्वरस्यैव उपादानत्वमुपादेयत्वमपि उपपद्यते..... 54

८.८.१ आक्षेपः - उपादानोपादेययोः नैकनिष्ठत्वमिति नेश्वर उपादानम्.....54

८.८.२ परिहारः - उपादानोपादेययोः नैकनिष्ठत्वमिति नेश्वर उपादानमित्याक्षेपस्य समाधानम्.....54

८.९ सर्वाणि तत्त्वानि प्रलये ब्रह्मणि एकीभवन्तीति सत्कार्यवादसम्भवः..... 56

८.९.१ आक्षेपः - प्रळये लयश्रुतेः सत्कार्यवादासम्भवः.....56

८.९.२ परिहारः - प्रळये लयश्रुतेः सत्कार्यवादासम्भवः इति न युक्तम्.....56

८.१० द्रव्ययोरपि चिदचितोः ब्रह्मोपादानकत्वमुपपद्यते..... 59

८.१०.१ आक्षेपः - विशेषणीभूतयोः चेतनाचेतनयोः अविकारी ईश्वरः नोपादानम्.....59

८.१०.२ परिहारः - विशेषणीभूतयोः चेतनाचेतनपदार्थयोः ब्रह्मोपादानकत्वसमर्थनम्.....59

८.११ नित्यविभूतेः नित्यतया ब्रह्मणविशेषणत्त्वात् न प्रतिज्ञोपरोधः..... 61

८.११.१ आक्षेपः - नित्यविभूतेः सृष्ट्यभावात् तस्या ईश्वरस्य नोपादानकत्वम्.....61

८.११.२ परिहारः - नित्यविभूतेः सृष्ट्यनन्तर्भावात् तस्या नोपादेयत्वम्.....62

८.१२ 'एकत्वे सति नानात्वं नानात्वे सति चैकता' इत्येतत् ब्रह्मण्येवोपपद्यते..... 63

८.१२.१ आक्षेपः - ब्रह्मपरिणामः, एकत्वावधारणञ्च कथम् उपपद्यते 63

८.१२.२ परिहारः - चिदचिद्विशिष्टं ब्रह्म एकमेव; विशेषणमुखेन परिणामः 63

८.१३ शरीरभूतयोः चिदचितोः परिणामेऽपि ब्रह्मण उपादानत्वं मुख्यमेव..... 65

८.१३.१ आक्षेप: - प्रकृतिपुरुषयो: व्यवहितत्वात् तयोर्विशिष्टस्य ईश्वरस्य उपादानममुख्यमेव 65

८.१३.२ परिहार: - प्रकृतिपुरुषयो: स्वरूपानन्तर्भावेऽपि ब्रह्मण उपादानत्वं मुख्यमेव 66

८.१४ सर्वनियामक: सर्वशेषी परमात्मैव कृत्स्नस्य जगत: मुख्यम् उपादानम्..... 66

८.१४.१ आक्षेप: - कालादयोऽपि उपादानमिति प्रमाणसत्त्वात् ईश्वर एव सर्वस्य नोपादानम्.....66

८.१४.२ परिहार: - कालादीनां नोपादानत्वम्.....67

९.० ब्रह्मणो अभिन्ननिमित्तोपादानत्वस्य समर्थनम्..... 70

९.१ प्रतिज्ञादृष्टान्तानुपरोधात् ब्रह्मैव जगदुपादानं निमित्तं च.....70

९.२ अभिध्योपदेशाच्च ब्रह्मैव जगदुपादानं निमित्तं च.....72

९.३ साक्षाच्चोभयाम्नानाच्च ब्रह्मैव जगदुपादानं निमित्तं च 73

९.४ आत्मकृतेरिति हेतोश्च ब्रह्मैव जगदुपादानं निमित्तं च.....74

९.५ परिणामाच्च ब्रह्मैव जगदुपादानं निमित्तं च 75

९.६ योनिश्च हि गीयते इति हेतोश्च 76

१०.० उपसंहार:..... 79

अनुबन्धा:..... 81

सङ्केताक्षरविवरणम्..... 82

ग्रन्थसूची 85

ब्रह्मणो अभिन्ननिमित्तोपादानत्वप्रतिपादने उपात्तानि प्रमुखश्रुतिस्मृतिप्रमाणानि..... 88

पदार्थकोषः..... 94

श्री:

मङ्गलश्लोका:

श्रीनिवासं जगन्नाथं नारायणमनामयम् ।
सर्वान्तर्यामिणं वन्दे सर्वकारणकारणम् ॥
वन्देऽहं यामुनमुनिं भगवद्भक्तिसागरम् ।
सिद्धान्तस्थापकाचार्यं रामानुजमुनिं तथा ॥
वेदान्ताचार्यवर्येति यमशाम्सीज्जगत्पति: ।
तं वन्दे देशिकं येन वेदान्तार्थास्सुरक्षिता: ॥
यत्पदाम्भोरुह-न्यस्त-स्वात्मभारोऽस्मि निर्भर: ।
श्रीनिवासं यतिश्रेष्ठं ध्यायं ध्यायं नमाम्यहम् ॥
श्रीनिवासकृपापात्रं कृष्णतातार्यदेशिकम् ।
त्रय्यन्तपरमाचार्यं भजेऽहं हृदि सर्वदा ।
यस्याचिन्त्याद्भुतदयानुग्रहादात्मवानहम् ।
तं वन्देऽनन्तरङ्गार्यं पितरं दैवतं सदा ॥

१.० भूमिका

अथास्मिन् प्रबन्धे जगत् प्रति ब्रह्मणो अभिन्ननिमित्तोपादानत्वं कथं विशिष्टाद्वैतदर्शने प्रतिपादितम् आचार्यै: इति विचार्यो विषय: । अनादिकालेनाऽपि अस्य विचित्रमहदाश्चर्यानन्तवस्त्वात्मकस्य जगत: रहस्यं जिज्ञासव:

विचारितवन्तः । साम्प्रदायिकतत्त्वज्ञाः आधुनिकविज्ञानिनोऽपि अस्य महदाश्चर्यभूतस्य प्रपञ्चस्य उत्पत्तिस्थितिलयानां अस्मिन्जगति विद्यमानानाम् अनन्तचिदचिदात्मकवस्तूनां वैचित्र्यं तेषां स्वरूपस्वभाववैविध्यं सर्वं ज्ञातुं महत्प्रयन्तं कृतवन्तः कुर्वन्नेव सन्ति अद्याऽपि । सर्वेऽपि कञ्चन प्रमाणमाश्रित्यैव तेषां विचारप्रतिपादनं समर्थनं च कृतवन्तः कुर्वन्ति च । परन्तु अतीन्द्रियविषयाणां स्वरूपस्वभावविज्ञाने वेदान्ता एव परमप्रमाणमिति अस्माकं भारतीयानां प्रतिज्ञा ।

वेदान्तदर्शनान्यपि अनेके सन्ति तेषां प्रमाणप्रमेयप्रतिपादने भेदा अपि वर्तन्ते । तेषु अन्यतमं दर्शनं विशिष्टाद्वैतदर्शनमिति यत् भगवद्रामानुजाचार्यैः सर्वतोमुखतया स्थापितम् । अस्य सिद्धान्तस्य श्रीमन्नारायण एव प्रथमाचार्यः । तस्मादेव 'योब्रह्माणं विधदाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै'[1] इति श्रुत्युक्तरीत्या आचार्य-शिष्यपरम्परया प्रथितमिदम् दर्शनम् अधुनापि साधकानां मनांसि मोमुदीति । अस्मिन् दर्शने जगत्कारणत्वविचारे अतिमहत्वपूर्णसिद्धान्तः कृतः यत् ब्रह्मैव जगत् प्रति उपादानकारणं निमित्तकारणमपि इति श्रुतिसूत्रस्मृतिप्रमाणाभ्यां सम्यक् स्थापितञ्च । तद्विषये अनेके आचार्याः तेषां ग्रन्थेषु सूक्ष्मपरीक्षणं कृतवन्तः पूर्वपक्षोदिताक्षेपान् विमृश्य उत्तराणि दत्तवन्तश्च । तेषां विमर्शनानामेकत्र क्रोडीकरणं न कृतमितः पूर्वमिति तदेव अस्य संशोधनस्य उद्देश्यम् । अस्मिन् प्रबन्धे विशिष्टाद्वैतसिद्धान्तप्रवर्तकानां प्रमुखाणामाचार्याणां ग्रन्थेषु उक्तस्य जगत्कारणत्वविषयस्य प्रतिपादनावसरेषु ये ये प्रमुखा अंशाः निरूपिताः ते क्रोडीक्रियन्ते । तदङ्गतया सम्बद्धाः विषया अत्र प्रस्तूयन्ते ।

---

[1] श्वे.उ.६-१८

२.० विशिष्टाद्वैतदर्शनं तस्य प्रवर्तनकाराश्च

सुविदितमेतत् यत् द्वैताद्वैतविशिष्टाद्वैतदर्शनानि वैदिकदर्शनानीति । तत्र भगवद्रामानुजाचार्यैः[2] सुस्थापितमिदं विशिष्टाद्वैतदर्शनं श्री रामानुजदर्शनमित्येव सुप्रसिद्धं तापत्रयातुराणाम् अशेषतापोपशमनक्षमम् अमृतत्वप्रापकं च भगवद्भक्त्यब्धेरुद्भूतममृतमिव विराजते । प्राचीनमेवेदं विशिष्टाद्वैतदर्शनं यत् ऋग्वेदादिषु सर्वेषु वेदेषु सर्वतोमुखतया उल्लसितं वर्तते । जीवब्रह्मणोः जगतश्च भेदप्रतिपादकवाक्यानाम् अभेदप्रतिपादकवाक्यानां च मुख्यार्थमेव स्वीकृत्य बृहदारण्यके याज्ञवल्क्योक्त-अन्तर्यामिब्राह्मणस्थ-शरीर-शरीरिभावप्रतिपादक-घटकश्रुत्युक्तरीत्या[3] चिदचितोः ब्रह्मणश्च शरीर-शरीरिसम्बन्धस्थापनेन सर्वश्रुतिसामञ्जस्यम् उद्घोषितमत्र आचार्यैः ।

इदं च दर्शनं वैष्णवाग्रेसरैः आल्वारिति[4] प्रख्यातैः भगवद्भक्ति-सागरावगाहजनित-ब्रह्मानन्दानुभवपरिवाहरूपेषु दिव्यप्रबन्धेषु तमिलुभाषायां प्रतिपादितम् अत्यद्भुतरीत्या । पश्चात् टङ्क-द्रमिड-गुहदेव-कपर्दि-भारुचि-नाथमुनि[5]-

[2] क्रैस्ताब्दः १०१७-११३७

[3] बृ.उ.३-७

[4] आधुनिकाः क्रैस्ताब्दे ३००-७०० इति, साम्प्रदायिकाः क्रि.पू.३००० पूर्वमिति

[5] नाथमुनिः क्रैस्ताब्दे ८००-९२३

इत्यादिभिराचार्यैः प्रतिष्ठापितमिदं तेषां नैकेषु प्रकरण-व्याख्यान-ग्रन्थेषु । तदनन्तरं भगवद्यामुनमुनयः[6] सिद्धित्रयम्, गीतार्थसङ्ग्रहः, स्तोत्ररत्नमित्यादि ग्रन्थान् अकार्षुः । तेऽपि आचार्याः सिद्धित्रये ईश्वरस्य जीवस्य धर्मभूतज्ञानस्य च स्वरूपं सम्यक् स्थापितवन्तः सन्ति । गीतार्थसङ्ग्रहे भगवद्गीतायाः विशेषार्थान् सङ्ग्रहेण अत्यद्भुतरीत्या प्रतिपादितवन्तोऽपि सन्ति ।

ततः यामुनमुनेः शिष्याः भगवद्रामानुजाचार्याः आचार्यादिष्टेन वर्त्मना वेदार्थसङ्ग्रह इति ग्रन्थे विशिष्टाद्वैतदर्शनस्य प्रमुखप्रमेयान् 'भक्तियोगमवतारयामास'[7] इत्युक्तरीत्या सुष्ठु स्थापितवन्तः सन्ति । ते ब्रह्मसूत्राणां सुविस्तृतं व्याख्यानं विशिष्टाद्वैतदर्शनानुसारेण प्रप्रथमतः श्रीभाष्यनामके ग्रन्थे व्यरचयन् । श्रीभाष्ये इतरदर्शनानां सूक्ष्मविश्लेषणपूर्वकं स्वमतं ते सम्यक् स्थापितवन्त इति सुप्रसिद्धमेव । भगवद्रामानुजाचार्याः श्रीमद्गीताभाष्यम्, वेदान्तदीपः, वेदान्तसार इत्याख्यव्याख्यानग्रन्थानपि कृतवन्तः सन्ति ।

तदनन्तरं कवितार्किकसिम्हः सर्वतन्त्रस्वतन्त्रः वेदान्ताचार्य इत्याद्यनेकप्रसिद्ध-बिरुदावलिभिरलङ्कृतैः श्री निगमान्तमहादेशिका[8] इति प्रसिद्धैः श्री वेङ्कटनाथैः शताधिकग्रन्थरचनापूर्वकं कृतमप्रकम्प्यमेतत् विशिष्टाद्वैतदर्शनम् । इत्थम् अनेके आचार्याः शतशः व्याख्यानग्रन्थान् कृतवन्तः । श्री सुदर्शनसूरयः, वात्स्यवरदाचार्याः, पराशरभट्टाचार्याः, श्री पिल्लैलोकाचार्याः, मनवालमामुनयः, दशोपनिषद्भाष्यकारा इति प्रसिद्धाः

---

[6] क्रैस्ताब्दे १०-११ तमे शतमाने

[7] श्रीरामानुजगीताभाष्यावतारिका

[8] क्रैस्ताब्दः १२६८-१३७८

श्रीरङ्गरामानुजयतय:[9] एतेऽपि प्रमुखा: । इत्थं सुप्रतिष्ठितमिदं विशिष्टाद्वैतदर्शनम् अद्यापि वेदान्तदर्शनेषु प्रमुखस्थानमलङ्कृत्य विराजमानं सत् भक्ति-प्रपत्तिसाध्य: अखिलहेयप्रत्यनीक: सकलकल्याणगुणाकर: जगत्कारणभूत: सर्वशक्ति: सर्वज्ञ: सकलफलप्रद: मुमुक्षुभि: ज्ञातव्य: परंब्रह्माख्य: श्रीमन्नारायण एवेति जोघुष्यत् जीवानां संसारनिवृत्तये परममुपायमुपदिशति ।

[9] क्रैस्ताब्दे १६ तमे शतमाने

३.० विशिष्टाद्वैतदर्शनस्य प्रधानांशा:

अस्मिन् दर्शने अनेके असाधारणसिद्धान्ता: प्रतिपादिता: सन्ति । तेषां सर्वतन्त्रप्रतितन्त्राभ्युपगम-सिद्धान्तानां प्रधानांशा एवं सन्ङ्ग्रहीतुं शक्यन्ते :

३.१ मीमांसा इति एकमेव शास्त्रम् ।अत एव चतुर्दशविद्यास्थानानि -

अङ्गानिवेदाश्चत्वारो मीमांसा न्यायविस्तर: ।
पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दश ॥[10] **इति उच्यन्ते ।**

अत: पूर्वोत्तरमीमाम्सयोरैकशास्त्र्यमिति अङ्गीकृतम् अस्ति अस्मिन् दर्शने ।

३.२ सर्वेषां वेदवाक्यानां मुख्यार्थमेव स्वीकर्तव्यम् । कानिचन दर्शनेषु कानिचन वाक्यानि अमुख्यतया स्वीक्रियन्ते यानि तेषां प्रधानसिद्धान्तप्रतिपादितानां तत्वार्थानां विरुद्धार्थं बोधयन्ति । अत्र तु विशिष्टाद्वैतदर्शने सर्वेऽपि वेदवाक्यानि मुख्यार्थमेव बोधयन्तीति स्वीकृतमस्ति ।

---

[10] मनुस्मृति:

३.३ प्रमाणानि त्रीणि प्रत्यक्षम्, अनुमानं शब्दप्रमाणमिति । शब्दप्रमाणन्तु वेदा एव । तेन कर्म-ब्रह्मकाण्डयो: सङ्ग्रह: । तथैव वेदाविरुद्धानां स्मृतीतिहासपुराणानां च प्रामाण्यं स्वीकृतमस्त्यस्मिन् दर्शने । भगवता श्रीमन्नारायणेनोक्ता पाञ्चरात्रागमा अपि परमप्रमाणानीति अङ्गीक्रियन्ते ।

३.४ अस्मिन् दर्शने यद्यपि चित्, अचित्, ईश्वर इति तत्त्वत्रयं स्वीक्रियते तथापि चिदचितो: ईश्वरस्य शरीरभूत-प्रकारतया 'अशेष चिदचिद्प्रकारं ब्रह्म एकमेव तत्त्वम्'[11] इति सविशेषब्रह्माद्वैतं प्रतिपादितमस्ति । तत्तु विशिष्टाद्वैतमिति श्री सुदर्शनसूरिभि: तात्पर्यदीपिकायां[12] (वेदार्थसङ्ग्रहव्याख्या) प्रथमत उक्तमस्ति । विशिष्टाद्वैतमिति पदस्य 'विशिष्टस्य अद्वैतमिति' अथवा 'विशिष्टं च विशिष्टं च विशिष्टे तयोरद्वैतमिति' वा विग्रह: । चिदचिद्विशिष्टं ब्रह्म एकमेव इति प्रथमस्य, सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणं स्थूलचिदचिद्विशिष्टं ब्रह्मकार्यमिति कार्य-कारणयोरद्वैतमिति द्वितीयस्य च विवरणम् ।

३.५ सोऽपि ईश्वर: शास्त्रैकसमधिगम्य इति शब्दा एव प्रमाणं तस्य साधने ।

---

[11] न्या.सि.जड.पु.२

[12] वे.सं.पु.६०

३.६ जीवात्मान अनन्ता:, अतिसूक्ष्माणुस्वरूपाश्च । ते ज्ञानानन्दस्वरूपा: ज्ञानगुणका: भगवत: शेषभूताश्च । कर्मानुगुण्येन संसरन्तो भक्ति-प्रपत्त्यन्यतर-उपायानुष्ठानेन परमपदाख्ये श्रीवैकुण्ठे भगवन्तं श्रीमन्नारायणं प्राप्य तस्य कैङ्कर्ये निरवधिकब्रह्मानुभवमनुभवन्ति संसारे नपुनरावर्तन्ते च ।

३.७ चिदचिदात्मकं सर्वं जगत् ईश्वरस्य शरीरतया प्रकारभूतम् । ईश्वर: शरीरी सर्वमितरत् तस्य शरीरमिति बृहदारण्यकश्रुत्युक्तरीत्या प्रतिपादितमस्ति अस्मिन् दर्शने । शरीरशरीरिणो: लक्षणमित्थमुक्तं श्रीभाष्यकारै: 'सर्वात्मना आधारतया नियन्तृतया शेषितयाच आप्नोतीत्यात्मा; सर्वात्मना आधेयतया नियाम्यतया शेषतया च अपृथक्सिद्धं प्रकारभूतं शरीरम्'[13] इति । तदेव श्री सुदर्शनसूरिभिरुक्तं 'व्याप्यत्वे सति सर्वात्मना स्वार्थे धारयितुं शक्यं शरीरं; व्याप्तत्वे सति यावद्द्रव्यभावितया स्वार्थे धारयितुं शक्त आत्मा'[14] इति । अत्र स्वार्थशक्तपदाभ्यां उत्पतनादि-व्यापाराणां रुग्णशरीरस्य च अव्याप्ति: परिहृतम् । 'व्याप्यत्वे' इति दलेन घटपटादीनां व्यावृत्ति: । सर्वात्मना इति दलेन परकायप्रिविष्टस्य परकायशरीरे अतिव्याप्तिपरिहार: । 'व्याप्यत्वे' इति दलेन धर्मभूतज्ञानस्य दीपादे: प्रभा इत्यादीनां व्यावृत्तिश्च इति एतल्लक्षणमदुष्टं भवति ।

---

[13] वे.सं.पु.१८५

[14] वे.सं.पु.१८६

४.० प्रबन्धस्य विषय: प्रयोजनं च

'कारणं तु ध्येय:'[15] इति भगवती श्रुतिरुद्घोषयति । संसारबन्धमुक्तये जगत्कारणवस्तुन: ध्यानं कर्तव्यमिति श्रुति: विधत्ते । तस्य स्वरूपमेव जिज्ञासुभि: शिष्यै: आचार्यान् प्रति पृष्टमिति उपनिषत्सु वयं पश्याम: । श्वेताश्वतरे 'किं कारणं ब्रह्म कुत: स्म जाता: जीवाम केन क्व च सम्प्रतिष्ठा: । अधिष्ठिता केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम्'[16] इति प्रथम मन्त्र एव कारणस्वरूपं विशोधितम् । मुण्डकेऽपि 'कस्मिन्नु खलु विज्ञाते सर्वमिदं विज्ञातं भवति'[17] इति शौनको महाशालो आचार्यम् अङ्गिरसं विधिवदुपसन्न: पप्रच्छेति श्रूयते । भगवद्बादरायणोऽपि प्रथमं सूत्रम् 'अथातो ब्रह्मजिज्ञासा'[18] इति असूत्रयत् । परब्रह्मैव तापत्रयातुरै: जिज्ञास्य इति उपनिषदां घोष: । ज्ञातव्यतया उपदिष्टस्य ब्रह्मण: किं लक्षणमिति विवक्षायां भगवान् बादरायण: 'जन्माद्यस्य यत'[19] इति द्वितीयब्रह्मसूत्रे अस्य जगत: सृष्टिस्थित्यादिकं येन क्रियते तदेव ब्रह्मेति स्थापयति । तदेव विशदीकुर्वन् प्रथमाध्याये ब्रह्मणो जगत्कारणत्वमेव पूर्णतया विशोध्य सम्यक् स्थापयति भगवद्बादरायण: । तदपि जगत्कारणत्वम् अभिन्ननिमित्तोपादानरूपमेव इति

---

[15] अथर्वशिखोपनिषत्-२-१७

[16] श्वे.उ.१-१

[17] मु.उ.१-१-३

[18] ब्र.सू.१-१-१

[19] ब्र.सू.१-१-२

भगवद्रामानुजाचार्यैः प्रतिपादितं वेदार्थसङ्ग्रहे । अस्मिन् प्रबन्धे ब्रह्मणो अभिन्ननिमित्तोपादानरूपं जगत्कारणत्वं श्रुतिस्मृतिसूत्रेषु विशिष्टाद्वैतदर्शनानुसारेण कथं प्रतिपादितमिति विचार्यते । कथमाचार्यवर्याः एनं प्रतितन्त्रसिद्धान्तं बहुपूर्वपक्षसूक्ष्मेक्षापूर्वकोत्क्षेपमूलकं स्थापितवन्त इति विव्रियते च । एष प्रबन्धः जिज्ञासूणां मुमुक्षूणां च परब्रह्मस्वरूपनिर्णये तत्प्राप्तये च दिङ्मात्रदर्शनमपि कर्तुमलमिति आशास्तेऽयं जनः । अनेन प्रबन्धस्य प्रयोजनमपि सूचितं भवति ।

५.० कारणत्वसम्बन्धिन: केचन सिद्धान्ता:

५.१ कारणतावादा:

प्रथमतो अन्यान्यदर्शनेषु प्रतिपादिता: केचन कारणतावादा: निरूप्यन्ते ।

५.१.१ साङ्ख्यमतोक्तसत्कार्यवादसङ्ग्रह:

साङ्ख्यकारिकायामित्थमुक्तम् :

असदकरणात् उपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्यस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥[20] इति ।

साङ्ख्या: सत्कार्यवादिन: । ते तु प्रकृतिरेव जगदुपादानकारणमिति प्रतिपादयन्ति । जगदपि त्रिगुणात्मकम् अत: प्रकृतेरेव कार्यम् कार्ये कारणभावादिति हेतो: इति । तेषां मते कार्यं कारणे अनुद्भूतरूपेण वर्तते । तस्य उद्भूतरूपमेव कार्यम् असदकरणात् । कार्यस्य उपादानमपि आवश्यकं तथैव कार्यकारणयो: नियतसम्बन्ध: वर्तते । तिलेन न घटस्योत्पत्ति:, परन्तु तैलमेव ।सर्वसम्भवाभावात् । तथा कुलाल: घटमेव कर्तुं शक्त:, न तु पटं वा गृहं वा शक्यस्य शक्यकरणात् । कार्ये कारणस्य भावमेव अनुवर्तते अत: पूर्वं सत एव कार्यस्य अभिव्यक्ति: कारकव्यापारेण भवतीति

[20] साङ्ख्यकारिका-९

तै: सत्कार्यवादं प्रतिपादितमस्ति ।

५.१.२ न्यायदर्शने कार्यकारणवादस्य निरूपणम्

नैय्यायिकास्तु असत्कार्यवादिन: । 'कुम्भकार: घटं कर्तुमारभत' इति उक्त्या पूर्वमसत: घटस्य उत्पत्तिरेव कार्यमिति ते आरम्भवादिन: ।पूर्वमसत उत्पत्तिरेव कार्यमिति प्रतिपादयन्ति । प्रागभावप्रतियोगि कार्यम् इति ते वदन्ति । ते तु कारणत्रयं प्रतिपादयन्ति समवाय्यसमवायिनिमत्तमिति । समवाय्यसमवायिभिन्नमेव निमित्तकारणम् । गुणगुणिनो: क्रियाक्रियावतो: जातिव्यक्त्यो: अवयवावयविनो: नित्यद्रव्यविशेषयोश्च अयुतसिद्धयो: सम्बन्ध: समवाय इति प्रतिपादयन्ति । ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तौ अयुतसिद्धाविति कथ्येते । अत्र साङ्ख्योक्तम् उपादानकारणं नैय्यायिकानां समवायिकारणे अन्तर्भूतमिति वक्तुं शक्यते ।

५.१.३ विशिष्टाद्वैतमते सत्कार्यवादनिरूपणम्

विशिष्टाद्वैतवेदान्तिनां तु सत्कार्यवाद एव।परन्तु साङ्ख्योक्तसत्कार्यवादात् भिद्यते । साङ्ख्यानां मते कारणे मृदि घटत्वाद्यवस्थानामपि सूक्ष्मरूपेण सत्त्वम् अङ्गीक्रियते । अत: पूर्वम् अनभिव्यक्तस्य कारकव्यापारेण अभिव्यक्तिरेव कार्यं न तु घटात्मना परिणाम: । सिद्धान्ते तु मृद: घटात्मना परिणाम एव अङ्गीक्रियते घटत्वाद्यवस्थानामेव पूर्वमसत्त्वात् । घटे मृद्द्रव्यस्य अनुवर्तमानत्वात् मृत्तिकेत्येव सत्यमिति वचनं सङ्गच्छते । अत: द्रव्यस्य

अवस्थान्तरापत्तिरेव कार्यमिति अयं सत्कार्यवाद: परिष्कृतपरिणामवाद इत्यपि कथ्यते ।

५.२ उपादानस्य लक्षणम्

द्रव्यम् उपादानं यथा घटस्य मृत्पिन्ड: पटस्य तन्तवश्च । वैशेषिकैरयमेव समवायिकारणतया अङ्गीकृत: पदार्थ: । अपिच कार्ये यस्य अनुवृत्तिर्दृश्यते तदेव उपादानम् इतरत् निमित्तमिति उपादानं निमित्ततो भिन्नम् ।

सिद्धान्ते तु कारणस्य अवस्थान्तरापत्तिरेव कार्यम् । वेदान्तदेशिका: 'आगन्तुको अपृथक्सिद्धधर्मोऽवस्था'[21] इति श्रीमति न्यायसिद्धाञ्जने अवस्थाया: लक्षणं निरूपितवन्त: । अत एव श्रुतप्रकाशिकायां प्रकृत्यधिकरणभाष्यविवरणे भाव्यवस्थाविशेषवत: प्रागवस्थायोगो हि उपादानत्वमिति उक्तं श्री सुदर्शनसूरिभि: । वैशेषिकमते आद्यक्षणे द्रव्यमगुणम् अक्रियाकञ्च अवतिष्ठत इति गुणं प्रति द्रव्यस्य उपादानत्वमस्त्येव । सिद्धान्ते द्रव्यस्य परिणामादेव अवस्थान्तरापत्तिरिति पूर्वावस्थविशिष्टं द्रव्यम् उत्तरावस्थविशिष्टं द्रव्यं प्रति उपादानम् भवति । एतल्लक्षणं च उत्तरत्र ब्रह्मण उपादानत्वस्य निरूपणावसरे परीक्ष्य परिष्क्रियते ।

[21] न्या.सि.जड.पु.२२६

५.३ उपादनोपादेययोरभेदः सङ्गच्छते

वैशेषिका अवयवातिरिक्तावयविनम् अङ्गीकुर्वन्ति । अवयवी अवयवादत्यन्तभिन्नः, अखन्ड एकश्च । सिद्धान्ते तु अवयवातिरिक्तावयवी नाङ्गीक्रियते । एतत् 'कार्योपादानभेदे..'[22] इति श्लोके निराकृतं देशिकैः । उपादानोपादेययोः 'नान्यत्वं नामसङ्ख्याव्यवहृतिधिषणाकारकालादिभेदैः' इति यद्यपि नामभेदः सङ्ख्याभेदः व्यवहृतिभेदः बुद्धिभेद आकारभेदः कालभेदश्च वर्तते तथापि पत्रताटङ्कवत् अभेदो स्वीकर्तव्यः । यथा तालपत्रमेव कर्णे स्त्रिय आभरणवत् धरन्ति तथा घटोऽपि मृद् अवस्थाविशेष एव इति अवयवातिरिक्त अवयवी नास्त्येव । असंयुक्ताः तन्तव अवयवा इत्युच्यन्ते । त एव तन्तवः संयोगविशेषविशिष्टाः पट इति । अत अतिरिक्तावयवी नाङ्गीक्रियते सिद्धान्ते । उपादानोपादेययोरभेदस्तु सूत्रकारैः आरम्भणाधिकरणे स्पष्टमुक्तं च ।

५.४ उपादाननिमित्तत्वयोरेकनिष्ठत्वम्

समवाय्यसमवायिकारणयोः भिन्नं निमित्तकारणमिति नैय्यायिकाः । अतो यत् समवायिकारणं न तन्निमित्तं यत् निमित्तं न तत् समवायिकारणमिति वदन्ति । लोके उपादानं निमित्तं च भिन्नतया एव दृश्येते । परन्तु श्री देशिकः

[22] त.मु.क.जड.२०

'कर्तोपादानमेव स्वसुखमुखगुणे स्वप्रयत्नप्रसूते'[23] इति श्लोके जीवः स्वप्रयत्नजनितसुखदुःखयोः स्वयमेव समवायिकारणमिति नैय्यायिकैः अङ्गीकृतमिति निरूपयति । अत्र जीवः कर्ता तथा उपादानमपि भवति । कर्तृत्वमेव निमित्तम् अतो जीवस्य उपादानत्वनिमित्तत्वे सम्भवतः । तथैव ईश्वरोऽपि विभुस्वरूपस्सन् सर्वमूर्तद्रव्यसंयोगस्य स्वयमेव कर्ता इति तस्यापि उपादानत्वनिमित्तत्वे सम्भवतः । नैय्यायिकानां निमित्तकारणमपि पारिभाषिकमिति श्री देशिकाः । अपिच यद्यपि मृद एव नानाविधावस्थापन्नानां तत्कार्याणां घटशरावादीनाम् अवस्थाभेदः तथापि घटशरावादौ 'इदं पूर्वाण्हे मृत्तिकैवासीत्' इति प्रत्यभिज्ञा जायत एव। तेन उपादानोपादेययोरभेदः ज्ञायते इति तयोरेकनिष्ठत्वम् उपपन्नम् ।

[23] त.मु.क.ना.१७१

६.० जगत्सृष्टिरहस्यम्

सृष्टेः रहस्यं किमिति वेदा उपदिशन्ति । अपितु अतिगूढं सृष्टिरहस्यम् उपनिषद्गुहासु निहितं न केनापि पूर्णतया ज्ञातुं शक्यते । पूर्वाचार्याः अतिकृपया श्रुत्यर्थान् विस्तरेण व्याख्यातवन्तः । प्रथमतः जगत् सृष्टं वा न वेति प्रश्न उद्भवति । अस्मिन् चिदचिदात्मके जगति जीवात्मानः तथा प्रकृतिविकारा अचेतनपदार्था अपि वर्तन्ते । श्रुतिः वक्ति 'न हन्यते हन्यमाने शरीरे'[24] इति । यदा अचेतनं प्राकृतं शरीरं नश्यति आत्मा न हन्यते यतो हि स नित्य एव इति । अपितु अन्यत्र 'यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्'[25] इत्यादयः जगतः सृष्टिं जीवात्मनामुत्पत्तिं च वदन्ति । कथमेतेषां समन्वय इति प्रश्न उद्भवत्येव ।

दार्शनिकाः विविधरीत्या सृष्टिं विवृतवन्तः । मीमांसकाः वदन्ति जगत् एवमेव सदा वर्तमानं सत् सृष्टिरेव नास्तीति । साङ्ख्याः सृष्टेः प्रकृतिरेव कारणमिति उपपादयन्ति । योगदर्शने जगत् प्रति ईश्वरः निमित्तकारणं प्रकृतिरुपादानमिति प्रतिपादयन्ति । शाङ्कराः सृष्टेः व्यावहारिकत्वम् अङ्गीकुर्वन्ति । विवर्तवादप्रतिपादनात् जगत् ब्रह्मणि अध्यस्तमिति वदन्ति । विशिष्टाद्वैतशास्त्रे ईश्वर एव निमित्तमुपादानं च जगत्सृष्टौ । सर्वेऽपि वेदप्रामाण्यमङ्गीकुर्वन्ति परन्तु वेदवाक्यानां दुरवगाहत्वात् सर्वसमन्वितमर्थं प्रतिपादितुं नातीव सुलभम् ।

---

[24] कठ.उ.२-१८

[25] म.ना.उ.४

भगवद्रामानुजाचार्याः सकलवेदवाक्यानां मुख्यार्थमेव स्वीकृत्य सर्वसमन्वितं दर्शनमुपस्थापितवन्तः। तेषामपि 'अतः परीक्ष्यकर्तव्यं न तु मद्वाक्यगौरवात्' इत्येव प्रतिज्ञा । ऋग्वेदश्रुतिरेवम् उद्घोषयति 'य इमा विश्वा भुवनानि जुह्वदृषिर् होता न्यसीदत् पिता नः'[26] इति । इदं सर्वं विश्वकर्मणा सृष्टमिति वक्ति भगवती श्रुतिः । पुरुषसूक्तं हिरण्यगर्भसूक्तं च जगत्सृष्टिं वर्णयतः । ऋग्वेदे नासदीयसूक्ते 'नासदासीत् नोसदासीत् तदानीम्'[27] इति सृष्टेः पूर्वं सदसतोरसत्त्वम् उक्तम् । अन्यत्र 'सदेव सोम्येदमग्र आसीदेकमेव अद्वितीयम्'[28] इति सृष्टेः पूर्वं सच्छब्दवाच्यस्य एकस्यैव सत्त्वं श्रूयते । तर्हि सच्छब्दवाच्यः परमात्मा कुत्र स्थितः सन् केन द्रव्येण जगदसृजत् इति श्रुत्येव 'किं स्विद्वनं क उ स वृक्ष आसीत्, यतो द्यावापृथिवी निष्टतक्षुः... यदध्यतिष्ठत् भुवनानि धारयन्', 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत्..ब्रह्माध्यतिष्ठत् भुवनानि धारयन्'[29] इति प्रश्नप्रतिवचनाभ्यां सृष्टेः रहस्यमुपदिशति । भगवद्बादरायणाः द्वितीये ब्रह्मसूत्रे ब्रह्मलक्षणमुक्तवन्तः 'जन्माद्यस्य यत'[30] इति । 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्ति अभिसम्विशन्ति तद्ब्रह्म'[31] इति श्रुतिः विषयवाक्यतया अत्र स्वीक्रियते । येन जगत्सृष्ट्यादिकं क्रियते तदेव ब्रह्म इति ब्रह्मलक्षणमुक्तम् । तस्य ब्रह्मणः सर्वज्ञत्वं सर्वशक्तित्वं सत्यसङ्कल्पत्वमित्यादयो गुणाः

---

[26] ऋ.१०-८१-१

[27] ऋ.१०-१९२

[28] छा.६-२-१

[29] तै.ब्रा.२-८-७,८

[30] ब्र.सू.१-१-२

[31] तै.उ.भृ.१

श्रूयन्ते 'यः सर्वज्ञः सर्ववित्'[32], 'परास्य शक्तिः विविधैव श्रूयते'[33], 'सोऽकामयत'[34] इत्यादिषु । एतत् सर्वं सूत्रकारेण प्रथमाध्याये चतुर्थपादे प्रकृत्यधिकरणे स्थापितमस्ति ।

अतः सर्वेश्वरः सर्वशक्तः सत्यसङ्कल्पः सर्वज्ञः परमात्मा जगत्कारणम् । तस्य सङ्कल्पादेव जगत्सृज्यते । प्रकृतिः नित्या पुरुषश्च नित्यः । तौ ब्रह्मणः शरीरतया तत्प्रकारौ । सृष्टेः पूर्वमपि तयोः सत्त्वात् प्रलये इदं सर्वं चेतनाचेतनात्मकं तमश्शब्दवाच्यं नामरूपविभागानर्हसूक्ष्मदशापन्नं सत् परमात्मना एकीभावेन वर्तते । पुनः परमात्मनः सङ्कल्पात् नामरूपविभागार्हस्थूलरूपेण परिणमति तदेव सृष्टिरिति कथ्यते । एतदेव 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत'[35] इत्युक्तम् । सृष्टौ चेतनानां देहेन्द्रियादीनां सह संयोगो जायते । कथं कश्चन देवः कश्चन मनुष्य इत्यादिभेदो वर्तत इति चेत् चेतनानां सञ्चितकर्मैव तत्र कारणमिति 'वैषम्यनैर्घृण्ये न सापेक्षत्वात्'[36] इति ब्रह्मसूत्रे उक्तमस्ति । कर्मसापेक्षत्वात् ईश्वरस्य वैषम्यनैर्घृण्यादि-दोषा न सन्ति । चेतनानां कर्मैव कारणं तेषां सुखदुःखाद्यनुभवे । कथं सृष्टेः पूर्वं कर्मविभागस्य सत्त्वं सदसतोरसत्त्वश्रवणादिति आकाङ्क्षायां 'न कर्म

[32] मु.उ.१-१-९

[33] श्वे.उ.६-८

[34] तै.उ.आ.६

[35] बृ.उ.१-४-७

[36] ब्र.सू.२-१-३४

अविभागादिति चेन्न अनादित्वात्'[37] इति सूत्रे कर्मणाम् अनादित्त्वात् एतत् उपपद्यते इतुक्तं बादरायणै: । अत ईश्वर: सृष्टौ स्वसङ्कल्पेन चेतनानां कर्मानुसारं तेषां देहयोगादिकं दत्त्वा स्वत अनुप्रविश्य अन्तर्यामितया सर्वं नियमयन् स्वशरीरभूतचेतनाचेतनपदार्थं स्थूलजगदाकारेण परिणमयति इत्येतदेव सृष्टे: रहस्यम् इति श्रुतिसूत्रानुगुणं प्रतिपादितं भगवद्रामानुजाचार्यै: । अपृथक्सिद्धविशेषणे स्वशरीरे एव परिणाम इति ईश्वर: निरवद्य: निष्कल: निरञ्जन: सकलकल्याणगुणाकर: सर्वज्ञ इत्येतत् सर्वमुपपद्यते । सर्वं जगत् ब्रह्मात्मकमिति एतत् सत्यमिति खलु 'मृत्तिकेत्येव सत्यम्'[38] इति दृष्टान्ते उक्तम् । अत ईश्वरज्ञानेन सर्वं जगत् तदात्मकं ज्ञायते इति एकविज्ञानेन सर्वविज्ञानसम्भव: । जगत: ईश्वरस्य च अनन्यत्वम् शरीरशरीरिभावात् सङ्गच्छते । यदि कर्मसापेक्षा अस्ति तथापि ईश्वरस्य अतिप्रयाससाध्यसृष्ट्या किं प्रयोजनमिति प्रश्न: पुनरुद्भवति । तत्र सूत्रकारा: 'लोकवत्तु लीलाकैवल्यम्' इति ईश्वर: स्वलीलार्थमेव जगत् सृजति इति वदन्ति । लीला इत्यस्य भगवतो दया इत्यपि आचार्या: वर्णयन्ति ।यतो हि चेतनानामुद्धरणार्थमेव खलु ईश्वर: परमकारुणिक: तेषां देहादिकं प्रदत्ते । एवं विशिष्टाद्वैतदर्शने सृष्टे: रहस्यम् प्रतिपादितमाचार्यै: । अस्य सिद्धान्तस्य असाधारणो विषय: यत् परमात्मा एव उपादानकारणं निमित्तकारणं च जगत इति । अस्मिन् प्रबन्धे तस्य जगत्कारणस्य परमात्मनो अभिन्ननिमित्तोपादानत्वं कथं समर्थितम् आचार्यैरिति किञ्चित् विचार्यते ।

---

[37] ब्र.सू.२-१-३५

[38] छा.६-१-४

७.० ब्रह्मणो अभिन्ननिमित्तोपादानत्वस्य निरूपणम्

भगवद्रामानुजाचार्या: वेदार्थसङ्ग्रहे प्रथमत: ब्रह्मणो अभिन्ननिमित्तोपादानत्वं प्रतिपादितवन्त: । एतदपि आल्वार् इति प्रसिद्धानां पूर्वाचार्याणां तथा बोधायन-टङ्क-द्रमिडादि-पूर्वाचार्याणां च ग्रन्थोक्तदिशा भगवद्बादरायणानुगृहीतानां ब्रह्मसूत्राणां च अनुगुणमेव सर्वश्रुत्यविरोधेनचेति तेषां प्रतिज्ञा ।

वेदार्थसङ्ग्रहे स्वपक्षस्थापनावसरे सद्विद्यायां वर्तमानस्य 'उत तमादेशमप्राक्ष्य' इत्यस्य वाक्यस्य व्याख्यानं कुर्वन्तो आचार्या: ब्रह्मण उपादानत्वं सुष्ठु प्रतिपादयन्ति । आचार्य उद्दालक: विद्यास्नातं पुत्रं श्वेतकेतुं प्रति एतत् पृच्छति 'उत तमादेशमप्राक्ष्यो येन अश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'[39] इति । अत्र आदेश शब्दस्य अर्थ उपदेश इति अनेके आचार्या व्याख्यातवन्त: । भगवद्रामानुजाचार्यास्तु आदेश शब्दस्य आदिश्यते अनेनेत्यादेश:, आदेश: प्रशासनमिति श्रुत्यनुगुणमर्थं प्रकाशितवन्त: । अतो आदेशम् इत्यस्य आदेष्टारं प्रशासितारमिति अर्थो फलितो भवति । तस्य प्रमाणानि च 'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत:'[40] इति श्रुतौ,

---

[39] छा.६-१-३

[40] बृ.उ.३-८-८

'प्रशासितारं सर्वेषाम्'[41] इति मनुस्मृतौ च दर्शयन्ति । न केवलं श्रुत्यन्तरे अपितु अत्रैव सद्विद्याप्रकरणेऽपि ब्रह्मण: प्रशासितृत्वं कण्ठोक्तमिति च दर्शयन्ति कारणवाक्यस्य व्याख्यानावसरे । 'सदेव सोम्येदमग्र आसिदेकमेवाद्वितीयम्' इत्यस्य कारणवाक्यस्यार्थं विशदीकुर्वन्त: 'एकमेव इति जगदुपादानतां प्रतिपाद्य अद्वितीयपदेन अधिष्ठात्रन्तरनिवारणात् अस्यैव अधिष्ठातृत्वमपि प्रतिपाद्यते; अत: तं प्रशासितारं जगदुपादानभूतमपि पृष्टवानसि, येन श्रुतेन मतेन विज्ञातेन अश्रुतममतमविज्ञातं श्रुतं मतं विज्ञातं भवति'[42] इति । अद्वितीयपदेन अधिष्ठात्रन्तर निवारणमिति यदुक्तं तत्र अधिष्ठातृत्वं नाम प्रेरकत्वमेव तच्च प्रशासितृत्वमिति फलितमिति आचार्या: । येन श्रुतेन अश्रुतं श्रुतं भवति इति यदुक्तं तस्य अर्थं विवृणोति ब्रह्मण: केवलसत्तयैव न कृत्स्नं ज्ञातं भवति अपितु तज्ज्ञानेनैव ज्ञातं भवति इति । इदमेव पुन: सङ्गृण्हन् 'निखिलजगदुदयविभवविलयादि कारणभूतं सार्वज्ञ्य-सत्यकामत्व-सत्यसङ्कल्पत्वादि-अपरिमितोदारगुणसागरं किं ब्रह्मापि त्वया श्रुतमिति हार्दो भाव'[43] इति ।

अत्र उपादानत्वं न कण्ठोक्तं किं तु फलितमिति श्री सुदर्शनसूरय: । 'निखिल..'[44] इत्यनेन श्रीभाष्यकारोक्तवाक्येन ब्रह्मणो जगत्कारणत्वाभिप्रायस्य प्रयोजनं किमिति उक्तमिति तात्पर्यदीपिकायाम् उक्तम् । श्रुत्यन्तरेषु यत् श्रूयते

---

[41] मनुस्मृति:१२-१२२

[42] वे.सं.पु.२९

[43] वे.सं.पु.३०

[44] वे.सं.पु.३०

'यतो वा इमानि भूतानि जायन्ते' इत्यादि तत्र तु जगत्कारणत्वलक्षणकं ब्रह्म श्रुतम् । अत्र उद्दालकस्य पुत्रं प्रति 'किं त्वया ब्रह्म श्रुतम्' इति प्रश्नस्य ब्रह्मणो जगत्कारणत्वगर्भत्वं प्रयोजनम् । ब्रह्म इति न कण्ठोक्तमत्र तस्मात् जगत्कारणत्वान्तर्भावप्रयोजनब्रह्मश्रवणप्रश्न इति श्री सुदर्शनसूरयः[45] । अत एव अत्र जगत्कारणत्वोपयोगिनां सर्वज्ञत्व-सत्यकामत्व-सत्यसङ्कल्पत्वेत्यादीनां गुणानां स्पष्टोक्तिरिति भाष्यकारेण वेदार्थसङ्ग्रहे उक्तम् ।

तदेव भाष्यकाराः सङ्ग्रहेण इत्थं वदन्ति 'तस्य निखिलकारणतया, कारणमेव नानासंस्थानविशेषसंस्थितं कार्यमित्युच्यते इति कारणभूत सूक्ष्मचिदचिद्वस्तुशरीरक ब्रह्मविज्ञानेन कार्यभूतमखिलं जगत् विज्ञातं भवतीति हृदिनिधाय 'येन अश्रुतं श्रुतं भवति..' इति पुत्रं प्रति पृष्टवान् पिता'[46] इति । अत एव अत्र उद्दालकप्रश्ने 'अश्रुतं श्रुतं भवति' इत्यस्य जगदुपादानमिति अश्रुतं यदि ज्ञायते तदा सर्वं तत्कार्यं श्रुतं भवति इत्यर्थः ।

अत्र ब्रह्मण उपादानत्वमेव मुख्यतया प्रतिपादयन्ति आचार्याः यतो हि निमित्तत्वं ब्रह्मणः सङ्कल्पादेव सिद्धमिति । अस्मिन् दर्शने कर्तृत्वमेव निमित्तत्वमिति अङ्गीकृतमस्ति । परमात्मनः कर्तृत्वं न्यायदर्शने तथा योगदर्शने च अङ्गीकृतमेव । सूत्रकारा अपि 'प्रकृतिश्च47' इति सूत्रे प्रकृतिशब्देन ब्रह्मण उपादानत्वमुक्तवन्तः । ब्रह्मणो निमित्तत्वं

---

[45] वे.सं.पु.३०

[46] वे.सं.पु.३१

[47] ब्र.सू.१-४-२३

सिद्धमेवेति केवलचशब्देन सूचितवन्तः । निमित्तत्वं तु श्रुतिप्रमाणेन तथा युक्त्यापि साधितमस्ति परन्तु उपादानत्वं शब्दप्रमाणेनैव साध्यमिति ब्रह्मण उपादानत्वस्य विस्तृतप्रतिपादनं कृतमाचार्यैः सर्वत्र ।

८.० ब्रह्मणो अभिन्ननिमित्तोपादानत्वे सिद्धान्तोक्ता: प्रधानांशा:, तेषाम् आक्षेपपरिहारौ च

ब्रह्मण: जगत् प्रति अभिन्ननिमित्तोपादानत्वविषये सिद्धान्ते प्रतिपादितानां प्रधानवादानां सङ्ग्रहोऽस्मिन् प्रकरणे क्रियते । 'विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् । सिद्धान्तश्चेति पञ्चाङ्गम्' इत्युक्तरीत्या अस्मिन् जगत्कारणत्वविषये अनेके पूर्वपक्षा: सम्यङ्मरीक्षिता उत्तराणि दत्तवन्तश्च आचार्यै:, स्वसिद्धान्तस्थापनञ्च सप्रमाणं कृतम् । तेऽपि पूर्वपक्षा अनेकेषु व्याख्यानग्रन्थेषु उद्धृता: भगवद्रामानुजाचार्याद्यै: आचार्यै: । तेषु पूर्वपक्षेषु केचन पूर्वपक्षा: स्पष्टतया इतरसिद्धान्तनिरूपणग्रन्थेषु दृष्टा: केचन तु स्वयमाचार्यैरुद्धृता: सन्ति । एतेषु केचन प्रधानपूर्वपक्षाणाम् आक्षेपपरिहारयो: सङ्ग्रहोऽत्र क्रियते ।

८.१ ईश्वर एव उपादानं जगत:, न प्रकृति:[48]

८.१.१ आक्षेप: - उपादानस्य विकारावश्यम्भावित्वात् प्रकृतिरेव उपादानं जगत:, न ईश्वर:

भगवान्बादरायण: प्रथमाध्याये ईश्वरस्य जगत्कारणत्वं सम्यक् उपपादितवान् अस्ति । सोऽपि ईश्वर: सकलकल्याणगुणाकर: नित्य एक: सर्वज्ञ: निर्विकार: सत्यसङ्कल्पत्वादिगुणयुक्त इति ईक्षत्यधिकारण-

[48] वेदार्थसङ्ग्रह: पु.१८१, श्रीभाष्ये विलक्षणाधिकरणम् (२-१-४), प्रकृत्यधिकरणम् (१-४-२३)

आनन्दमयाधिकरणादिषु[49] प्रतिपादितम् । एवम्भूतस्य ईश्वरस्य जगत्कारणत्वं यद्यपि अङ्गीकृतम् तथापि वेदान्ता: जगत: प्रकृतिरेव उपादानमिति स्पष्टतया उच्यन्ते । अधिष्ठाता सर्वज्ञ: परिणामरहितो ईश्वर: परिणामिनीमचेतनाम् अधिष्ठानभूतां प्रकृतिमेव उपादानतया स्वीकृत्य सृजते विश्वम् इति । यदि ईश्वर एव उपादानं भवति तर्हि तस्य निर्विकारत्व-नित्यत्वादि स्वरूपं निरूपयन्त: श्रुतय: कुप्यन्ते । ईश्वरस्य निर्विकारत्व-नित्यत्वादीन् उद्घोषयन्ति 'निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'[50], 'स वा एष महानज आत्मा अजरोऽमृत:'[51] इत्यादय: । प्रकृतेरपि विकारित्व-परिणामित्वादीन् उद्घोषयन्ति 'विकारजननीमज्ञां अष्टरूपामजां ध्रुवाम्'[52], 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी'[53] इत्यादय:। ईश्वर: प्रकृतिमेव उपादानतया स्वीकृत्य विश्वं सृजतीति 'अस्मान्मायी सृजते विश्वमेतत्'[54], 'मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्'[55] इत्यादौ श्रूयते च । अत ईश्वर: जगत: नोपादानमपितु प्रकृतिरेवेति प्रथम: पूर्वपक्ष: ।

८.१.२ परिहार: - ब्रह्मण उपादानत्वे न विकारापत्ति:

वेदान्तदेशिका: तत्त्वमुक्ताकलापे इत्थं निरूपयन्ति -

---

[49] ब्र.सू.१-१-५..२०

50 श्वे.उ.६-१९

51 बृ.उ.६-४-२४

52 मन्त्रिक.उ.

53 मन्त्रिक.उ.१

54 श्वे.उ.४-९

अस्यैवाचिन्त्यशक्तेरखिलजनयितुस्स्यादुपादानभाव:
सूक्ष्माव्यक्तादिदेह: परिणमति यतोऽनेकधा स्थूलवृत्त्या ।
निष्कृष्टेऽस्मिन् शरीरिण्यमलगुणगणालङ्कृतानन्दरूपे
संपद्यन्ते समस्तास्समुचितगतयो निर्विकारादिवादा: ॥[56]

निखिलजनयितु: 'जन्माद्यस्य यत'[57] इति ब्रह्मसूत्रोक्तस्य जगत्कारणस्य **अस्यैव** शास्त्रयोने: ब्रह्मण **उपादानभाव:** श्रौतमुपादानत्वमपि **अचिन्त्यशक्ते:** अचिन्त्यशक्तित्वात् **स्यात्** स्यादेव । ब्रह्मैव सृष्टे: पूर्वकाले 'तद्धेदं तर्ह्यव्याकृतमासीत्'[58] इति श्रुत्युक्तरीत्या सूक्ष्माव्यक्तदेह: सृष्टौ 'सोऽकामयत बहुस्यां प्रजायेय'[59], 'आत्मकृते:'[60] इत्यादिभ्य: श्रुतिसूत्रप्रमाणेभ्य: स्थूलजगद्रूपेण परिणमतीति तस्य निमित्तत्ववत् उपादानत्वमपि सङ्गच्छते । प्रलये 'तम: परेदेवे एकीभवति'[61] इति श्रुत्या एकीभाव: यत् श्रूयते ततो वैषम्यमत्र सूच्यते अनेकधेति । तदपि यथा शरीरिणो जीवस्य शरीरद्वारा 'बालो युवा जात:' इत्यादिपरिणामवत् अव्यक्तादिशरीरद्वारकपरिणाम: शरीरिणि निष्कृष्टे ब्रह्मणि निखिलहेयप्रत्यनीकारे आनन्दाद्यनन्तकल्याणगुणसागरे निराबाधमिति 'निष्कलं निष्क्रियं शान्तं

---

55 श्वे.उ.४-१०

56 त.मु.क.ना-२५

57 ब्र.सू.-२

58 बृ.उ.३-४-७

59 तै.आ.

60 ब्र.सू.१-४-२६

61 सुबाल.उ.३

निरवद्यं निरञ्जनम्'[62] इत्यादयो निरवद्यनिर्विकारादिवादा: सम्पद्यन्ते।

यदुक्तं भगवद्रामानुजाचार्यै: 'अत: प्रकृतिप्रकारसंस्थिते परमात्मनि प्रकारभूतप्रकृत्यम्शे विकार: प्रकार्यम्शे चाविकार: । एवमेव जीवप्रकारसंस्थिते परमात्मनि च प्रकारभूत जीवाम्शे सर्वेच अपुरुषार्था: । प्रकार्यम्श: नियन्ता निरवद्य: सर्वकल्याणगुणाश्रय: सत्यसङ्कल्प एव । तथा च सति कारणावस्थ ईश्वर एवेति तदुपादानक-जगत्कार्यावस्थोऽपि स एवेति कार्यकारणयोरनन्यत्वं सर्वश्रुत्यविरोधश्च भवति'[63] इति । अयं भाव: - प्रकृतिपुरुषयो: ईश्वरशरीरत्वात् प्रकृतिपुरुषशब्दौ तयोरात्मभूतस्य तत्तत् प्रकारसंस्थितस्य ईश्वरस्यैव वाचकौ इति तद्विकाराणामपि सैव आत्मा । तदेव श्रीविष्णुपुराणे उक्तं – 'व्यक्तं विष्णुस्तथाव्यक्तं पुरुष: काल एव च', 'स एव क्षोभको ब्रह्मन् क्षोभ्यश्च परमेश्वर:'[64] इत्यादौ ।

अपिच वेदान्तदेशिकै: अधिकरणसारावल्यामेवमुक्तम् –

मृत्पिण्डादे: कुलालप्रभृतिरिह पृथक् तद्वदेवादिकर्ता
नोपादानं विकारैर्विरहत इति न द्वारमात्रे विकारात् ।
मृद्-दृष्टान्तादिमात्रान्न च विकृतिरसौ स्यात् परस्य स्वरूपे

---

[62] श्वे.उ.६-१९

[63] वे.सं.पु १८२

[64] वि.पु.१-२-२०,३३

देहद्वारोर्णनाभि-प्रभृति-विकृतिवत्-व्यापृतेर्दर्शितत्वात् ॥[65] इति ।

लोके घटादि कार्येषु कारणभूतमृत्पिण्डादेः निमित्तकारणकुलालप्रभृतयः पृथगेव दृष्टाः । तद्वदेव जगत्सृष्टावपि आदिकर्ता ईश्वरः 'निष्कलं निरञ्जनम्' इत्यादिश्रुतिभिः विकाररहित इति सिद्धत्त्वात् नोपादानं भवति इति न युक्तं द्वारमात्रे विकाराङ्गीकृतत्वात् । लोके यथा बालत्वयुवत्वादि देहसम्बन्ध्यवस्थानां तद्विशिष्टे जीवे व्यवहारो दृश्यते तथैवेदमपि । स्वरूपविकारवत् मृद्दृष्टान्तादिमात्रात् असौ जगतः विकृतिः परब्रह्मणः स्वरूपे न स्यात् । जगतः विकृतिस्तु ऊर्णनाभिप्रभृतिविकृतिवत् 'यथोर्णनाभिः सृजते गृण्हते च'[66] इति श्रुत्युक्तरीत्या परमात्मनः शरीरभूत-चेतनाचेतनद्वारैव जगद्विकाररूपव्यापारस्य दर्शितत्वाच्चेति उपादानं ब्रह्म अविकारीति सुस्थम् । चेतनाचेतनयोः ईश्वरशरीरत्वं स्पष्टमुक्तं बृहदारण्यके 'यः पृथिव्यां तिष्ठन्...यस्य पृथिवी शरीरं',[67] 'य आत्मनि तिष्ठन्..यस्य आत्मा शरीरं'[68] इत्यादौ ।

'अस्मान्मायी सृजते विश्वमेतत्' इत्यस्य वाक्यस्य अभिप्रायस्तु भगवद्रामानुजाचार्यैः एवं वर्णितम् – 'ब्रह्मणि जगद्रूपतया विक्रियमाणेऽपि तत्प्रकारभूताचिदंशगतास्सर्वे विकाराः तत्प्रकारभूतक्षेत्रज्ञगताश्चापुरुषार्था इति विवेक्तुं प्रकृतिपुरुषयोः ब्रह्मशरीरभूतयोः तदानीं तथा निर्देशानर्हातिसूक्ष्मदशापत्त्या ब्रह्मणैकीभूतयोरपि भेदेन व्यपदेशः,

---

[65] अधि.सा.१४४

[66] मु.उ.१-१-८

[67] बृ.उ.५-७-३

'तदात्मानं स्वयमकुरुत'[69] इत्यादिभिरैकार्थ्यात्'[70] इति ।

'यदा तमस्तन्न दिवा न रात्रि:'[71] इति श्रुत्या तमश्शब्दवाच्यस्य अतिसूक्ष्मदशापन्नस्य अचिद्वस्तुन: प्रलयदशायामपि अस्तित्वमेवावगम्यते । अत: 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी'[72] इति तु प्रलयकालाचिद्वस्तु अतिसूक्ष्मदशापन्नं ब्रह्मप्रकारभूतं नित्यमेवेति तत्प्रकारिण: ब्रह्मणोभिधानम् ।

अत: परमात्मा तु चिदचितो: स्वशरीरभूतयो: नियन्तृतया आत्मभूत: । अत एव चिद्गतै: अपुरुषार्थै: अचिद्गतै: विकारैश्च असंस्पृष्ट एवावतिष्ठते । तदेव 'सत्यं चानृतं च सत्यमभवत्'[73] इति श्रूयते । 'ब्रह्म सत्यानृतशब्दवाच्यचिदचिद्रूपेण विक्रियमाणमपि सत्यमेवाभवत् निरस्तनिखिलदोषगन्धम् अपरिच्छिन्नज्ञानानन्दम् एकरूपमेवाभवदिति'[74] आचार्या: ।

---

[68] बृ.उ.मा.५-७-२२

[69] तै.उ.२-७

[70] श्रीभा.१-४-७

[71] श्वे.उ.४-१८

[72] मन्त्रिक.उ.१

[73] तै.उ.आ.६

ब्रह्मणो निर्दोषत्वं च श्रुतिसूत्रस्मृतिषु सहस्रशः दृशते । 'य पृथिव्यां तिष्ठन्...अन्तर्याम्यमृतः', 'य आत्मनि तिष्ठन्...अन्तर्याम्यमृतः', 'अपहतपाप्मा विजरो विमृत्युः विशोकः विजिघत्सः अपिपासः'[75] इत्यादिश्रुतिषु स्पष्टमुक्तम् । अमृत इत्यस्य दोषरहित इत्यर्थः । एतदेव सूत्रेषु 'न स्थानतोऽपि परस्य उभयलिङ्गं सर्वत्र हि'[76] इति सर्वत्र ब्रह्मण उभयलिङ्गं दोषरहितत्वं कल्याणगुणाकरत्वं च जोघुष्यते । दहरविद्यादिषु ब्रह्मणो अपहतपाप्मत्वादयः प्रसिद्धा एव ।

अतो जगत उपादानमपि ब्रह्म विकाररहित एवेति वादो अप्रकम्प्यः ।

८.२ ईश्वर एव जगतः निमित्तकारणमुपादानकारणमपि[77]

८.२.१ आक्षेपः - एकस्यैव निमित्तत्वमुपादानत्वं च न सम्भवति

कार्यस्य उपादानकारणं निमित्तकारणं सहकारिकारणमिति कारणत्रयमावश्यकमिति लोके प्रसिद्धमेव । घटकरणे कुम्भकारः निमित्तकारणं मृदेव उपादानं दण्डचक्रादयः सहकारिकारणानीति लोके दृश्यते । न हि लोके कुत्रापि एकस्य कार्यस्य उपादानं निमित्तं च अभिन्नं द्रष्टुं शक्यते । यदुपादानं तत् न निमित्तं यन्निमित्तं न तदुपादनमित्येव

---

[74] श्रीभा.१-४-२७

[75] छा.८-१-५

[76] ब्र.सू.३-२-११

[77] श्रीभा.१-४-२३, त.मु.क.ना.२६, अधि.सा.१४५

नियम: सर्वत्र लोके अस्ति । आचार्य उद्दालक: श्वेतकेतुं प्रति एकविज्ञानेन सर्वविज्ञानोपदेशसमये 'यथा सोम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्'[78] इति दृष्टान्तं प्रदर्शितवान् । यदा एक: मृत्पिण्ड: ज्ञायते तदा तद्विकारं घटशरावादि सर्वं विज्ञातं स्यादिति एकविज्ञानेन सर्वविज्ञानसम्भव इति उपपादितवान् । अत्र मृदा घटादिकरणे मृदेव उपादानं कुलाल: निमित्तमिति न कापि संशीति: । यथा मृद अचेतनत्वात् ज्ञानाभावात् न मृत् निमित्तं भवति तथैव कुम्भकारो अहं घट: स्यामिति सङ्कल्प्य घटरूपेण परिणमितुं न शक्त: खलु । तथैव वेदेऽपि ईश्वरस्य सर्वज्ञस्य निमित्तत्वमात्रं प्रकृते: अचेतनस्या उपादानत्वं च श्रूयते । अतो निमित्तम् उपादानं च अत्यन्तभिन्नावेव इति ईश्वर एकैव उपादानं निमित्तं च भवतीति वादो असम्भव एव । अतो एतद्दृष्टान्तानुगुणमेव दार्ष्टान्तिकेऽपि प्रकृतेरेव उपादानं ब्रह्मणो निमित्तमात्रत्वमभ्युपगन्तव्यमिति ब्रह्मण: साक्षाद्वा सद्वारकं वा उपादाननिमित्तत्वे न सम्भवत इति पूर्वपक्षस्याशय: ।

८.२.२ परिहार: - ब्रह्मण एव उपादानत्वनिमित्तत्वे सम्भवत:

यदुक्तं लोके एकस्यैव उपादानत्वं निमित्तत्वं च कुत्रापि न दृष्टमिति तदत्र परीक्ष्यते ।

अत्र वेदान्तदेशिका: नैय्यायिकमतानुसारेण कथमेकस्यैव कर्तृत्वमुपादनत्वं च अङ्गीकृतमिति इत्थं दर्शयन्ति –

कर्तोपादानमेव स्वसुखमुखगुणे स्वप्रयत्नप्रसूते

---

[78] छा.उ.६-१-४

संयोगं स्वस्य मूर्तैस्स्वयमुपजनयन्-ईश्वरोऽप्येवमिष्टः ।
सर्वोपादानभावस्तत इह घटते सर्वकर्तर्यमुष्मिन्
सर्वश्रुत्यैकरस्यप्रणयिभिरुचितं द्वारमत्राभ्युपेतम् ॥[79]

जीवः स्वप्रयत्नप्राप्तानां सुखदुःखादीनां स्वैव कर्ता । सुखदुःखादीनां जीवात्मन्येव वर्तमानत्वात् सैव उपादानमपि भवति इति परैरपि अङ्गीकृतमेव । तथैव ईश्वरोऽपि विभुस्सन् सर्वमूर्तद्रव्यैः स्वस्य संयोगं स्वयमुपजनयति । संयोगस्य ईश्वराश्रयत्वात् मूर्तद्रव्येश्वरसंयोगस्य सैव उपादानं निमित्तं च भवति । तथैव अत्रापि सर्वकर्ता ईश्वरः सर्वस्य निमित्तकारणं सर्वोपादानमपि इति घटते । अन्यथा सर्वश्रुत्यैकरस्यं न साधितुं शक्यम् । वयं तु विशिष्टाद्वैतसिद्धान्तिनः सर्वश्रुत्यैकरस्यप्रणयिन इति श्रुतिन्यायानुसारेण ईश्वरस्य अभिन्ननिमित्तोपादानत्वम् अङ्गीकुर्मः । 'तदात्मानं स्वयमकुरुत'[80] इति श्रुतिप्रसिद्धस्येश्वरस्य न स्वरूपपरिणामः, तस्य 'निरवद्यं निरञ्जनम्' इति दोषरहितत्वमपि श्रुतिसिद्धत्वात् । ईश्वरस्य स्वरूपपरिणामाभ्युपगमे जीवानामनित्यत्वं प्रसज्यते । जीवानां नित्यत्वं च 'नित्यो नित्यानां चेतनश्चेतनानाम्'[81], 'न जायते'[82] इत्यादिभिः श्रूयते । यदि जीवा अनित्याः तदा अकृताभ्यागम-कृतविप्रणाशप्रसङ्गः प्रसज्यते । अतः सर्वश्रुत्यैकरस्यप्रणयिभिः अस्माभिः श्रुत्यनुरोधेन

---

[79] त.मु.क.ना.२६

[80] तै.उ.२-१७

[81] श्वे.उ.६-१३

[82] कठ.उ.२-१८

द्वारमात्रपरिणामाभ्युपगम: क्रियते । ब्रह्मपदार्थंतु अखण्डतत्त्वं तथैव सविशेषदृष्ट्या सखण्डमपि भवति । केवलं परब्रह्मतत्त्वं वा अचेतनप्रकृतिर्वा न जगत्कारणम् अपितु चेतनाचेतनविशिष्टब्रह्मैव । अत एव ब्रह्मणो जगद्रूपपरिणामे विशेषणाम्शे अचेतने स्वरूपपरिणाम: चेतने स्वभावपरिणाम: विशेष्यांशे ब्रह्मणि न कदापि विकारप्रसक्तिरिति ब्रह्मण उपादानत्वं निमित्तत्वं च सुस्थम् ।

मृदृष्टान्तस्य का गतिरिति चेत् उपादानभूतस्य मृद अचेतनत्वात् स्वरूपपरिणाम: भवति अपितु न निमित्तत्वप्रसक्ति: । कुलालस्य केवल घटकरणे निमित्तत्वं न सर्वजगत्सृष्टौ सर्वज्ञत्वविरहात् तथा सर्वशक्तित्वविरहात् न कुत्रापि उपादानत्वप्रसक्ति: । ब्रह्मणस्तु सर्वशक्तित्त्वात् सर्वोपादानत्वं सर्वज्ञत्वात् सर्वसृष्टिकर्तृत्वम् उभयमपि सम्भवति ।

अपिच वेदान्तदेशिका अधिकरणसारावल्यामेवमुपपादयन्ति –

स्वज्ञानाद्यं स्वजन्यं भवति सृजति च स्वान्यसंयोगमीश:
संयोगे मूर्तनिष्ठे प्रकृतिरपि हि तत् स्यान्निमित्तं क्रियात: ।
एकस्याऽदौ बहुस्यामिति बहुभवनं सौभरिन्यायसिद्धं
भेदाभेदश्रुतीनामविहतिरिह च स्याद्विशिष्टैक्ययोगात्[83] ।।

नैय्यायिकाभ्युपगतं निमित्तमेव कर्तृत्वमिति आचार्या: जीवस्य कर्तृत्वोपादानत्वसम्भवस्य अत्रापि उपपादयन्ति ।

---

[83] अधि.सा.१४५

एतदपि प्रसिद्धं सौभरिन्यायसिद्धं यथा सौभरिऋषेः स्वतपोमहिमकृतानेकशरीरपरिग्रहे शरीररूपपरिणाम एव तथैव परमात्मनोऽपि जगद्रूपपरिणामः तस्य शरीरभूतचिदचितोरेवेति उपादानत्वनिमित्तत्वे सम्भवतः । तथैव 'द्वा सुपर्णा सयुजा सखाया[84]', 'क्षरं प्रधानममृताक्षरं हरः[85]', 'नित्यो नित्यानां'[86] इत्यादिभेदश्रुतीनां, 'नेह नानास्ति किञ्चन[87]', 'तत्त्वमसि[88]' इत्याद्यभेदश्रुतीनां च परस्पराविरोधेन अविहतिः स्यात् । कथमित्याकाङ्क्षायां भेदश्रुतयः स्वरूपभेदमुपदिशन्ति अभेदश्रुतयस्तु चेतनाचेतनविशिष्टस्य प्रकारिणो ब्रह्मण एकत्वमुपदिशन्ति इति ।

अपिच आकारभेदेन एकस्यैव पदार्थस्य उभयलक्षणस्यापि साधुत्वमुपपादयन्ति श्री वेदान्तदेशिकाः -

नोपादानं निमित्तं किमपि तदितरत् कारणं तद्धि विद्मो
यद्वा सिद्धं निमित्तं न भजति तदुपादानतामित्ययुक्तम् ।
इष्टादाकारभेदादुभयघटनतो लोकवेदानुरोधे
सिद्धे स्वच्छन्दलक्ष्मप्रणयनकुसृतिः पाकचिन्ताविपाकः[89] ॥ इति ।

नैय्यायिकैः यदुक्तं समवाय्यसमवायिकारणभिन्नं निमित्तकारणमिति तेन यदुपादानं न तन्निमित्तं यन्निमित्तं न तदुपादानं भवतीति एकस्यैव निमित्तत्वोपादानत्वे न संघटत इत्याशङ्क्य परिहरिति अत्र । आकारभेदेन एकस्यैव वस्तुनः सर्वलक्षणयोगोऽपि दृष्टं लोके यथा तुलायां प्रमाणप्रमेयव्यवहारन्यायेन एकस्यैव पदार्थस्य नानात्वव्यवहारः

---

[84] मु.उ.३-१-१

[85] श्वे.उ.१-१०

[86] श्वे.उ.६-१३

[87] बृ.उ.४-४-९

[88] छा.उ.६-९-४

सिध्यति । एवं लोके उपादाननिमित्तयो: भेदो दृश्यते तयोरभेदस्तु लोकवेदयो: दृश्यते इति स्वेच्छया तयोर्लक्षणनिरूपणं न युक्तम् । अतो ब्रह्मण: जगत् प्रति सूक्ष्मचिदचिद्विशिष्टवेषेण उपादानत्वं, 'बहु स्याम्' इति साङ्कल्पपूर्वकसृष्ट्या कर्तृत्वरूपनिमित्तत्वमपि सङ्गच्छते ।

८.३ अत्यन्तविलक्षणस्य जगतोऽपि ब्रह्मण उपादानत्वसम्भव:[90]

८.३.१ आक्षेप: - उपादानोपादेययो: सालक्षण्यनियमात् त्रिगुणात्मकस्य जगत ईश्वर: नोपादानं भवितुमर्हति

ये पुन: सत्कार्यवादिन: साङ्ख्या: उपपादयन्ति सर्वसम्भवाभावात् असदकरणात् काराणभावात् इत्यादिभि: हेतुभि: त्रिगुणात्मिका प्रकुतिरेव जगत उपादानमिति । लोके कार्य-कारणयो: नियम: दृश्यते हि तिलेनैव तैलं तन्तुना पटं मृदा घटं च उत्पादयितुं शक्यमिति । अत: कार्ये कारणस्य गुणा: सङ्क्रामन्तीति सर्वसम्मतम् । उपादानोपादेययो: सालक्षण्यमेव लोके सर्वत्र दृश्यते । अत: सुखदु:खाद्यात्मकं जगत् सत्वरजस्तमसो: कार्यमेव इत्यत्र क: सन्देह: । अत: त्रिगुणात्मिका प्रकुतिरेव एवम्भूतस्य जगत उपादानं भवितुमर्हति । कार्य-कारणयो: साधर्म्यम् अन्यथा न निरूपितुं शक्यतेति अत्यन्त विलक्षणयो: ब्रह्मणो जगतश्च नोपादानोपादेयभाव उपपद्यते । एतच्च विलक्षणत्वं न

---

[89] अधि.सा.१४७

[90] श्रीभाष्ये विलक्षणाधिकरणम्(२-१-४), अधि.सा.१६१, मु.उ.भा.पु.२५९

केवलं प्रत्यक्षादिभि: अपितु शब्दाच्च उपलभ्यते 'विज्ञानं चाविज्ञानं च'[91], 'समाने वृक्षे पुरुषो निमग्नो अनीशया शोचति मुह्यमान:[92]' इत्यादिभि: ।

८.३.२ परिहार: - त्रिगुणात्मकजगत् प्रति ब्रह्मण उपादानत्वसमर्थनम्

साङ्ख्यमतानुयायिन: तर्कमवलम्ब्य एवमाक्षिपन्ति । वयं पृच्छाम: कार्यकारणयो: किं सालक्षण्यमभिप्रेतमिति । यदि सर्वधर्मसालक्षण्यमभिप्रेतम् तर्हि कार्यकारणभाव एव नोपपद्यते । घटशरावादिकार्येषु कारणस्य मृत्पिण्डस्य पिण्डत्वाद्यनुवृत्ति: न दृश्यते । अत: केनचिदाकारेणैव साम्यमिष्टं भवति यथा पर्वतस्य परमाणोश्च पदार्थतया साधर्म्यमङ्गीक्रियते । तथैव गोमयात् वृश्चिकादि-उत्पत्तौ कार्यकारणसाधर्म्यनियमभङ्गो दृश्यते । एतदेव भगवद्बादरायणै: 'दृश्यते तु'[93] इति ब्रह्मसूत्रे स्पष्टीकृतं विलक्षणयोरपि कार्यकारणभाव: दृश्यत एवेति । लोके दृश्यते हि माक्षिकादे: विलक्षणस्य क्रिम्यादे: तस्मादुत्पत्ति: । एतत् सर्वं वेदान्तदेशिकै: एवं सङ्गृहीतम् –

विश्वं त्रैगुण्यवत्त्वात् त्रिगुणत उदितं नासमादित्ययुक्तं
सर्वाकारेण साम्यं क्वचिदपि न भवेत् केनचित् साम्यमिष्टम् ।
भग्ना हेतुव्यवस्थोचितगुणसमता गोमयाद्वृश्चिकादौ

---

[91] तै.आ.६

[92] मु.उ.३-१-२

[93] ब्र.सू.२-१-६

स्थूलत्वं याति चेश: प्रकृतितनुरत: सर्वचोद्योपमर्द:[94] **॥ इति ।**

अत: सूक्ष्मचेतनाचेतनशरीरको ईश्वर: स्थूलचेतनाचेतनशरीरो भवतीति सर्वचोद्योपमर्द: स्यात् ।

एतदेव मुण्डकोपनिषदि श्रूयते -

यथोर्णनाभि: सृजते गृण्हते च यथा पृथिव्यामोषधय: सम्भवन्ति ।

यथा सत: पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्[95] **॥ इति ।**

अस्मिन् मन्त्रे विलक्षणयोरपि उपादानोपादेयसम्भव इति स्पष्टमुक्तम् । अपिच लोके घटाद्युत्पत्तौ उपादानभूतमृत्पिण्डादिषु पूर्वावस्थस्य उपमर्दो दृश्यते । कानिचित् कार्येषु पूर्वावस्थाया: तिरोधानमपि दृश्यते यथा प्राकारादि निर्माणे इष्टकानाम् । अपितु यदा ऊर्णनाभि: स्वान्त:स्थिततन्तून् सृजति नि:सरतिच तत्र ऊर्णनाभे: उपादानत्वनिमित्तत्वे सम्भवत: । एकस्या एव पृथिव्या अत्यन्तविलक्षणौषध्युपादानत्वं पूर्वावस्थस्य उपमर्दतिरोधानाभावेऽपि सम्भवति । यथा सत: जीवतैव पुरुषस्य चेतनस्य अचेतनकेशलोमाद्युपादानत्वं तथैव निर्विकारात् परमात्मन: परस्परविलक्षणं चेतनाचेतनात्मकं निखिलं जगत् सम्भवतीति श्रीरङ्गरामानुजमुनिभि: व्याख्यातम्[96] ।

---

[94] अधि.सा.१६१

[95] मु.उ.१-१-८

[96] मु.उ.भा.२५९

८.४ प्रकृतिपुरुषयो: नित्ययो: ब्रह्मोपादानकत्वम्[97]

८.४.१ आक्षेप: - नित्यवस्तुन उपादेयत्वासम्भव:

श्रुतय: जीवस्य प्रकृतेरपि नित्यत्वम् उद्घोषयन्ति 'अजो नित्य: शाश्वतोयं पुराण:'[98], 'अजामेकां लोहितशुक्लकृष्णाम्'[99] इत्यदौ । यदि ईश्वर उपादानम् चिदचिदात्मकस्य प्रपञ्चस्य तर्हि जीवस्य प्रकृतेरपि नित्यत्वस्य का गति: ? अतो ईश्वर: नोपादानं सृष्टे: इत्येक: पूर्वपक्ष: ।

८.४.२ परिहार: - नित्ययो: प्रकृतिपुरुषयोरुपादेयत्वसमर्थनम्

जगत्सृष्टौ ब्रह्मणो निमित्तोपादानरूपं कारणत्वं यदभ्युपगतं तत्तु सजीवस्यप्रपञ्चस्य अविशेषेण ब्रह्मण: कारणत्वमिति उक्तं स्यात् । ब्रह्मणो अविशेषेण कारणत्वमपि 'यतो वा इमानि भूतानि जायन्ते'[100], 'सन्मूला: सोम्येमा: सर्वा: प्रजा:'[101], 'इदं सर्वमसृजत यदिदं किञ्च'[102] इत्यादिश्रुतिभ्य: 'निस्सरन्ति यथालोहपिण्डात् तप्ता: स्फुलिङ्गका: ।

---

[97] वे.सं.१७९, श्रीभा.१-४-२३

[98] कठ.उ.२-१८

[99] श्वे.उ.४-५, मना.उ.७०

[100] तै.उ.भृ.१

[101] छा.उ.६-८-६

सकाशादात्मन: तद्वत् आत्मान: प्रभवन्ति हि'[103] इत्यादिस्मृतिभ्यश्च अवगम्यते ।

अत्र ब्रह्मणो जीवरूपपरिणामे 'अजो नित्य: शाश्वतोयं पुराण:'[104], 'नात्मा श्रुते: नित्यत्वाच्च ताभ्य:'[105] इत्यादिश्रुतिसूत्रयो: विरोध: । जीवस्य अनित्यत्वप्रसङ्गात् अकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च स्यात् । अकृताभ्यागमश्च अहेतुकफलप्राप्ति: कृतविप्रणाश: कृतस्य कर्मणो निष्फलत्वम् ।

तथा प्रकृतेरपि अनादिता 'अजामेकां लोहितशुक्लकृष्णां बह्वी: प्रजा: सृजमानां सरूपा: । अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य:'[106] इत्यादिभि: श्रूयते । स्मृतौ च प्रकृतिपुरुषयोरनादित्वं 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि'[107] इति दृश्यते । द्वारभूताया: प्रकृते: परिणामित्वं च 'भूमिरापोऽनलोवायु: खं मनोबुद्धिरेवच । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते

---

[102] तै.आ.६-२

[103] या.स्मृ.प्रा.का.६-७

[104] कठ.उ.१-२-१८

[105] ब्र.सू.२-३-१८

[106] श्वे.उ.४-५

[107] भ.गी.१३-१९

जगत् ॥'[108] इति सिद्धम् ।

यदि प्रकृतेरेव परिणामित्वं तर्हि ब्रह्मणो उपादानत्वं कथमिति चेत् भगवद्रामानुजाचार्याः प्रकृतेरपि ईश्वरशरीरत्वं सिद्धमिति दर्शयन्ति[109] 'प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः[110], 'मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्'[111] इत्यादिभिः स्मृतिप्रमाणैः । अत्र प्रकृतिशब्दः प्रकृतेरात्मभूतस्य प्रकृतिप्रकारतयासंस्थितस्य वाचक इति । 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी'[112] इत्यत्रापि प्रकृतिवाचिगौरितिशब्दस्य तच्छरीरकब्रह्मवाचकत्वम् ।

एवमेव 'यतः प्रधानपुरुषौ यतश्चैतच्चराचरम् । कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु'[113] इत्यत्रापि पुरुषशब्दः तदात्मभूतस्य ईश्वरस्य पुरुषप्रकारसंस्थितस्य वाचक इति तद्विकाराणामपि तथैव ईश्वर आत्मा इति आचार्याः[114] ।

अतः प्रकारभूतप्रकृतिपुरुषयोरेव विकारापुरुषार्थौ न तु प्रकार्यम्शे परमात्मनि इति उपादानत्वप्रतिपादकश्रुतयः

---

[108] भ.गी.७-४

[109] वे.सं.पु.१८१

[110] भ.गी.९-८

[111] भ.गी.९-१०

[112] मन्त्रिक.उ.१

[113] वि.पु.१-१७-३०

विशिष्टाम्शविषया:, निर्विकारत्वप्रतिपादकश्रुतयस्तु विशेष्याम्शमात्रविषया इति सर्वमुपपद्यते । एतदेव उक्तं भगवद्बादरायणै: कार्यकारणयोरनन्यत्वमिति आरम्भणाधिकरणे[115] । तदुक्तं श्रीविष्णुपुराणेऽपि 'प्रधानपुंसोरजयो: कारणं कार्यभूतयो:'[116] इति । एतस्यार्थ: नामरूपविभागानर्हसूक्ष्मदशापन्नप्रकृतिपुरुषशरीरं ब्रह्म कारणावस्थं तदापत्तिश्च जगत: प्रलय इत्यभिधीयते । पुन: नामरूपविभागविभक्तस्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यावस्थम् ब्रह्मण: तथाविधस्थूलभाव एव सृष्टिरिति । अत्र अजयोरिति कारणावस्थायामपि प्रकृतिपुरुषयो: सत्त्वमुक्तम् । एतेन चिदचिद्विशिष्टस्य नित्यस्य ब्रह्मण: कथं सृष्टिप्रलययो: योग इत्याक्षेपोऽपि सूत्तरम् ।

अत: प्रकृतिपुरुषयोरनादित्वम् अजत्वं च ब्रह्मणो नित्यत्वम् अविकारित्वं च सर्वमुपपद्यते ।

८.५ समष्टिसृष्टेरपि ईश्वर एव उपादानम्[117]

८.५.१ आक्षेप: - तत्वानां सृष्टौ विशेष्यभूतस्य ईश्वरस्य उपादानत्वासम्भव:

छान्दोग्ये श्रूयते 'ततेज ऐक्षत बहुस्यां प्रजायेयेति । तदपोऽसृजत'[118] इति । अत्र तेजस अचेतनत्वात् ईक्षणं सङ्कल्पं

---

[114] वे.सं.१८१

[115] ब्र.सू.२-१-१५

[116] वि.पु.१-९-३७

[117] श्री.भा.१-४-२३, श्रु.प्र.१-४-२३, मु.उ.भा.पु.२३५,२३६

[118] छा.उ.६-२-३

तदन्तर्यामिणा परमात्मना कृतमिति भाष्यकारा: । तथैव अपां सृष्टौ तेजश्शरीरक: परमात्मा एव उपादानकारणं निमित्तकारणं च । अत्र यदि अस्ववस्थावत्परमात्मानं प्रति तेजस्त्वावस्थावत्परमात्मा उपादानं तर्हि अचेतनस्यापि उपादानत्वप्रसङ्ग: । ब्रह्मण: ब्रह्मान्तर्यामित्व प्रसङश्च ।

८.५.२ परिहार: - तत्वानां सृष्टौ विशेष्यभूतस्य ईश्वरस्य उपादानत्वसमर्थनम्

श्रीरङ्गरामानुजमुनिभि: मुण्डकोपनिषद्भाष्ये 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति'[119] मन्त्रस्य व्याख्याने 'सन्मूला: सोम्य इमा: सर्वा: प्रजा: सदायतना: सत्प्रतिष्ठा:'[120] इति उपादानोपादेयप्रतिपादके वाक्ये श्रीसुदर्शनसूरिभि: श्रुतप्रकाशिकायां 'यद्वा जगत इति निष्कर्षक: शब्द:'[121] इत्यादिना व्याख्यातस्य अभिप्रायस्य सङ्ग्रहो एवं कृतम् – 'प्रजाशब्दस्य विशेषणमात्रपरत्वमेव; सच्छब्दस्यापि विशेष्यमात्रपरत्वमेव । न च विशेषणीभूतचिदचिद्वर्गस्य सदुपादानकत्वं नास्तीति शङ्क्यम्; तस्यापि भाव्यवस्थावत्त्वेन विशिष्टस्येव विशेषणस्यापि ब्रह्मोपादानकत्वसम्भवादिति स्वाभिमतं पक्षान्तरमुपन्यस्तम्' इति ।

---

[119] मु.उ.१-१-३

[120] छा.उ.६-८-६

[121] श्रु.प्र.१-१-१

अत्र एक: पूर्वपक्ष: स्वेनैव उद्धृत:[122] - न च भाव्यवस्थावत् सर्वमुपादेयं पूर्वावस्थावत् सर्वमुपादानं चेत् भाविमहत्त्वाहङ्कारत्वाद्यवस्थावत्परमात्मानं प्रति अव्यक्तत्वलक्षणपूर्वावस्थाश्रयस्य अचेतनस्यापि उपादानत्वप्रसङ्ग इति । पश्चात् भाव्यवस्थावत: पूर्वावस्थायोगि यत् कारणं तत् उपादानमिति तल्लक्षणं परिष्करोति । तत्रापि नन्वव्यक्तत्वमहत्त्वाद्यवस्थाया अव्यक्तमहदादिनिष्ठत्वेऽपि ब्रह्मनिष्ठाभावेन पूर्वावस्थायोगित्वाभावात् कथमुपादानत्वमिति आक्षेपमुद्धृत्य परिहरति ।

प्रकृत्यधिकरणे व्यासार्यै: एष आक्षेपो एवं परिहृत: – 'ब्रह्मण: चिदचिच्छरीरकतया प्रकृते: ब्रह्मस्वरूपान्तर्गतत्वेन प्रकृत्यवस्थानां ब्रह्मावस्थात्वात् । न हि विशेष्यमात्रं विशिष्टस्य स्वरूपम् । विशिष्टस्य वस्तुनो विशिष्टमेव हि स्वरूपम् । न हि घटस्य मृन्मात्रं स्वरूपम् अपितु घटत्वविशिष्टम्'[123] इति । अत्र एक: संशय: यदि विशेषणानां स्वरूपान्तर्गतत्वं तर्हि किं दण्डादयोऽपि स्वरूपं स्युरिति उद्भवति । तत्र समाधानं तु यावद्द्रव्यभावि-अपृथक्सिद्धविशेषाणस्यैव स्वरूपान्तर्गतत्वमिति । यस्यापि वस्तुनो असाधारणकार्ययोग्यत्वमेव स्वरूपमिति वक्तुं शक्यते । घटस्य उदकाहरणम् असाधारणो धर्म: । तत्प्रति योग्यता च अच्छिद्रघटत्वमेव । तथैव स्फोटजननं प्रति वह्नेरुष्णत्वम् । तथैव च परमात्मनो जगद्रूपेण बहुभवनं तस्य असाधारणो धर्म: तत्प्रति प्रकृतिपुरुषकाला योग्यतास्थानीया तदेव शक्तिशब्देनच अभिधीयते । अतो महदाद्यवस्था: चिदचिद्विशिष्टब्रह्मस्वरूपान्तर्गता एव ।

---

[122] मु.उ.भा.पु.२३५

[123] श्रु.प्र.१-४-२३

एतच्च श्रुतिस्मृतिप्रमाणेभ्य: बहुकृत्व दर्शितं व्यासार्यै: । श्रुतौ 'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता:'[124] इति अरनाभि दृष्टान्ते न केवलं नाभिरपितु नाभिवत् अरनेमी अपि रथचक्रस्वरूपान्तर्गते इति स्पष्टमुक्तम् । तथैव 'अङ्गुष्ठमात्र: पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्ट: । तं स्वाच्छरीरात् प्रवृहेत् मुञ्जादिव इषीकाम्'[125] इति मुञ्जेषीकादृष्टान्ते बाह्यदलविशिष्टेषीका एव मुञ्जस्वरूपमिति दृश्यते । स्मृतौ च 'यथा हि कदली नान्या त्वक्पत्रादपि दृश्यते । एवं विश्वस्य नान्यस्त्वं त्वत्स्थायीश्वर दृश्यते'[126] इत्यत्र न काण्डमात्रं कदली अपितु त्वक्पत्रविशिष्टकाण्डस्वरूपा इति स्पष्टमवगमयति । एषु दृष्टान्तेषु अचेतनत्वात् तेषां न नियन्तृ-नियाम्यभाव इति न शरीरशरीरिभावश्च सम्भवति । ब्रह्मण: चिदचिद्रूपजगतस्तु शरीरि-शरीरभाव: सम्यगुपपद्यत इति महदाद्यवस्थानां विशिष्टब्रह्मस्वरूपान्तर्गतत्वात् मुख्यमेव उपादानत्वमिति अस्याक्षेपस्य परिहारो द्रष्टव्य: ।

८.६ विशिष्टस्यापि ईश्वरस्य उपादानत्वं मुख्यम्; न स्वरूपहानि:[127]

८.६.१ आक्षेप: - विशिष्टवेषेण ईश्वरस्य उपादानममुख्यं भवति, मुख्यं चेत् विकारापत्ति:

यदि तेजोविशिष्टब्रह्मण एव उपादानत्वं तर्हि ब्रह्मण उपादानत्वम् अमुख्यं भवति । एतत् नेष्टम् सिद्धान्तिनाम् ।

---

[124] कौ.उ.३-६१

[125] कठ.उ.६-१७

[126] वि.पु.१-१२-६७

[127] वे.सं.पु.५६

८.६.२ परिहारः - विशिष्टवेषेणापि ईश्वरस्य उपादानममुख्यं न भवति, न विकारापत्तिश्च

छान्दोग्ये यच्छ्रूयते 'ऐतदात्म्यमिदं सर्वं तत्सत्यं तत्त्वमसि श्वेतकेतो'[128] इति तद्वाक्यस्य विवरणावसरे व्यासार्यैः तात्पर्यदीपिकायां – 'ब्रह्मण एवोपादानत्व-निमित्तत्वोपपादनेन जगद्ब्रह्मणोरनन्यत्वमुक्तम्'[129] इति व्याख्यातम् । अत्र 'तत्सत्यम्' इत्यस्य ब्रह्मात्मकत्वं सत्यं सर्वस्य ब्रह्मकार्यत्वादित्यर्थः । तथैव दृष्टान्तेऽपि मृद्विकारं सर्वं मृदात्मनैव सत्यमिति उक्तम् । अत्र आचार्य उद्दालकः परिणामपक्षं प्रतिपादयन् त्रीणि दृष्टान्तानि दत्तवान् । तथैव दार्ष्टान्तिकस्यापि 'तत्तेजोऽसृजत'[130], 'तदात्मानं स्वयमकुरुत'[131] इत्यादीनि वाक्यानि परिणामरूपब्रह्मकारणत्वं दर्शयन्ति । सूत्राणि च 'परिणामात्'[132], 'आत्मकृतेः'[133] इत्यादीनि तदनुगुणमेवार्थं बोधयन्ति । विष्णुपुराणे च 'कटकमकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकम् । सुरपशुमनुजादिकल्पनाभिः हरिरखिलाभिः उदीर्यते तथैकः'[134] इति वचनं दृश्यते । अतः श्रुतिस्मृतिसूत्रानुगुण्यात् परिणामपक्षस्य अङ्गीकृतेसति एतच्च परिणामः किमद्वारक उत सद्वारक इति प्रश्न उदेति । ब्रह्मस्वरूपस्य निर्दोषत्वाविकारत्वादिश्रुतिस्मृतिसूत्रप्रमाणात् सद्वारकमेव

---

[128] छा.उ.६-८-६..१६

[129] वे.सं.५६

[130] छा.उ.६-२-३

[131] तै.उ.आ.७

[132] ब्र.सू.१-४-२७

[133] ब्र.सू.१-४-२६

[134] वि.पु.३-७-१६

उचितमिति स्थापितम् आचार्यैः । 'यस्यात्मा शरीरम्'[135] इत्यादिश्रुतयश्च जगत्ब्रह्मणोः शरीर-शरीरिभावप्रतिपादनेन सद्वारकपरिणाममेव घोषयन्ति । अपिच शरीरवाचिपदानां शरीरिपर्यन्तत्वात् एतत् सद्वारकमुपादानं च ब्रह्मणो मुख्यमेव भवति ।

मीमांसकैरपि सद्वारकस्य मुख्यत्वमभ्युपगतमिति व्यासार्यैः तात्पर्यदीपिकायां दर्शितं 'अरुणया क्रीणाति'[136], 'गवा यजते' इत्यादिषु गुणस्य जातेः क्रययजनसाधनत्वं सद्वारकमपि मुख्यमेवेति[137] । अतो विशिष्टस्यब्रह्मणः शरीरद्वारकमुपादानं मुख्यमेव इति सुस्थम् ।

८.७ चिदचिद्द्रव्ययोः परमात्मप्रकारतैकस्वभावत्वम्[138]

८.७.१ आक्षेपः - चिदचिद्द्रव्ययोः परमात्माख्यद्रव्येण सहोपलम्भनियमाभावात् जातिगुणवत् न परमात्मप्रकारतैकस्वभावत्वम्

यदुक्तं देवादिशब्दानां तच्छरीरकजीवे मुख्यतया वृत्तिरिति तदयुक्तम् तत्र सहोपलम्भनियमस्य अभावात् । तथैव

---

[135] बृ.उ.मा.३-७-३०

[136] पू.मी.३-१-९

[137] वे.सं.पु.५९

[138] वे.सं.पु.१८३

चिदचितो: परमात्माख्यद्रव्येण सहोपलम्भनियमाभावात् तयोरपि न तत्प्रकारतैकस्वभावत्वम् ।

८.७.२ परिहार: - चिदचिद्द्रव्ययो: परमात्मन: प्रकारतैकस्वभावत्वमुपपद्यते

आचार्यै: एवमुक्तम् – 'ईश्वरप्रकारभूतसर्वावस्थप्रकृतिपुरुषवाचिन: शब्दा: तत्प्रकारविशिष्टतयाऽवस्थिते परमात्मनि मुख्यतया वर्तन्ते, जीवात्मवाचिशब्दवत्'[139] इति तदुपरि एष आक्षेप: प्रकृतिपुरुषयो: परमात्मद्रव्येण सहोपलम्भनियमाभावात् कथमेतदुपपद्यते इति । देवमनुष्यादिशब्दा: प्रकारिणि जीवात्मन्येव मुख्यतया वर्तन्ते खलु । देवादिशरीराणि तु प्रकृतिपरिणामविशेषाण्येव इति तेषां जीवात्मप्रकारतयैव पदार्थत्वम् । अतो देवादि शब्दा: तद्विशिष्टस्य जीवस्यैव मुख्यतया वाचका: । 'सहोपलम्भनियमस्तु एकसामग्रीवेद्यत्वप्रयुक्त:, न नियतप्रकारत्वप्रयुक्त:, गन्धादिषु व्यभिचारात्'[140] इति व्यासार्यैरुक्तम् । तस्मात् नियतप्रकारत्वे किं प्रयोजकमित्याकाङ्क्षायां तदेकाश्रयत्वं तदेकप्रयोजनत्वं चेति एष आक्षेप: परिहृतो भवति ।

---

[139] वे.सं.१८३

[140] वे.सं.१८४

८.८ ईश्वरस्यैव उपादानत्वमुपादेयत्वमपि उपपद्यते[141]

८.८.१ आक्षेप: - उपादानोपादेययो: नैकनिष्ठत्वमिति नेश्वर उपादानम्

चेतनाचेतनविशिष्टपरमात्मैव उपादानमुपादेयं चेत्येतत् नोपपद्यते उपादानोपादेययो: लोके अभेदादर्शनात् । कारकव्यापारस्य च वैयर्थ्यप्रसङ्गात् ।

८.८.२ परिहार: - उपादानोपादेययो: नैकनिष्ठत्वमिति नेश्वर उपादानमित्याक्षेपस्य समाधानम्

छान्दोग्ये 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यम्'[142] इति यत् श्रूयते तत्र 'मृत्तिकेत्येवसत्यम्' इति उपादानोपादेययोरभेद एव उपपादित: । अत एव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापि सम्भवति । अपितु 'ऐतदात्म्यमिदं सर्वम्[143]' इत्यत्र 'इदं सर्व'मिति प्रतीयमानस्य जगतस्तु विशेषणभूतत्त्वात् विशिष्टाभेदो अत्यन्तासम्भव एव । यदुक्तं विशेषणभूतं जगत् शरीरम् अतो शरीरगतावस्थाया: शरीरनिष्ठत्वमेवेति तत्तु कुत्रापि लोके न दृश्यते । अपृथक्सिद्धधर्मास्तु धर्मिण एव उत्पत्त्याद्यवस्थाभूता इति अवस्था एव वस्तुन उत्पत्ति: । अत उपादानोपादेययोरभेदो न शक्यते वक्तुमिति पूर्व: पक्ष: ।

---

[141] वे.सं.३४, मु.उ.भा.२४३

[142] छा.उ.६-१-४

[143] छा.उ.६-८-७

अत्र ब्रूम: - न हि रूपरसादीनामुत्पत्तौ घट उत्पद्यत इति व्यवहार: । यदि घटे संयोगे जायमाने घटोत्पत्तिरिति व्यवहारस्तर्हि संयोगज इत्यस्य अनर्थ एव स्यात् । अपिच शब्दस्य उत्पत्तिरिति व्यवहारोऽपि न स्यात् । 'छन्दांसि जज्ञिरे तस्मात्'[144] इति श्रुतेरप्रामाण्यं स्यात् । यदि अपृथक्सिद्धधर्माणाम् उत्पत्तिविनाशावेव न स्यातां तर्हि आत्मन एव तौ सम्भवत: । अन्ततो ईश्वरस्यैव उत्पत्तिविनाशौ स्त इति एतस्य अप्रामाणिकत्वं स्फुटमेव ।

अस्मन्मते तु प्रकृतिविकृत्योर्भेदो अङ्गीक्रियते अपितु पृथक्स्थित्यनर्हत्वेन पृथक्सत्ता नास्तीत्यनेन कारकव्यापारस्यापि न वैयर्थ्यप्रसङ्ग: । मृद: घटस्य च नामभेद: व्यवहारभेद: सङ्ज्ञाभेद: कालभेद: बुद्धिभेद: वर्ततैवेति कारकव्यापारो अङ्गीक्रियते । परन्तु पूर्वं यत् मृदिति उक्तं तदेव घट इति व्यवह्रियते । आचार्यैरपि 'नानाव्यवहार आस्पदत्वाय घटशरावादिनानासंस्थानावस्थारूपविकारापन्नं नानानामधेयमपि मृत्तिकासंस्थानविशेषत्वात् मृद्द्रव्यमेव इत्थमवस्थितम्'[145] इति अवस्थाया: विकारत्वं प्रतिपादितम् । अतो श्रीरङ्गरामानुजमुनिभिरेवमुक्तम् – 'भिन्नयोरपि उपादानत्वाभ्युपगमात् अभिन्नसत्ताककारणत्वलक्षणम् अपृथक्सिद्धकारणत्वमेव उपादानत्वमिति संमतम्'[146] इति । ब्रह्मण: चेतनाचेतनवर्गं प्रति एवंरूपोपादानत्वस्य सत्त्वादेव आत्मभूते तस्मिन् ज्ञाते इतरत् सर्वं ज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापि उपपद्यते ।

---

[144] तै.आर.३-१२-४

[145] वे.सं.३४

[146] मु.उ.भा.२४३

८.९ सर्वाणि तत्त्वानि प्रलये ब्रह्मणि एकीभवन्तीति सत्कार्यवादसम्भव:[147]

८.९.१ आक्षेप: - प्रळये लयश्रुते: सत्कार्यवादासम्भव:

प्रलये सर्वतत्त्वानां सच्छब्दवाच्ये ब्रह्मणि लयश्रवणात् सूक्ष्मचेतनाचेतनस्य सृष्टे: पूर्वकाले सत्त्वासम्भव: । अत: सूक्ष्मचेतनाचेतनविशिष्टब्रह्मणो जगत्कारणत्वम् अप्रामाणिकमेव ।

८.९.२ परिहार: - प्रळये लयश्रुते: सत्कार्यवादासम्भव: इति न युक्तम्

सुबालोपनिषदि ब्रह्मशरीरतया ब्रह्मात्मकानां तत्त्वानां प्रलये स्वकारणे ब्रह्मण्येव लय आम्नायते, 'पृथिव्यप्सु प्रलीयते आप: तेजसि लीयन्ते तेजो वायौ लीयते...अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तम: परेदेवे एकी भवति'[148] इति । प्रकृतिपुरुषयोरपि परमात्मनि लय: भगवता पराशरेण 'पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि'[149] इति प्रतिपादित: । लयशब्देन विनाशो अभिमत इति सृष्टौ एकमेवेति एकत्वावधारणात् सच्छब्दवाच्यब्रह्मण: पुन: जगत्सृष्टिश्रवणात् असत्कार्यवाद एव श्रुतौ प्रतिपादित इति भाति । तदपि एवं परिहृतं श्रीवेदान्तदेशिकै: -

उक्त्वा तत्त्वान्तराणां विलयमथ तमस्येकतामात्रमुक्तं
प्रोक्तश्चानादितादि प्रकृतिपुरुषयोर्वेदतद्वेदिवाक्यै: ।
लीयेते तौ परस्मिन्निति तु लयवचस्स्यादयस्तोयनीत्या

---

[147] श्री.भा.१-४-२७, अधि.सा.चि.१४८

[148] सु.उ.२

[149] वि.पु.६-४-३९

तेनासौ भोक्तृभोग्यप्रभृतिकवचिताद्विश्वसृष्टिस्समीची[150] ॥

वेदवाक्यै: वेदान्तविद्भि: पराशरादिभिरपि प्रकृतिपुरुषयोरुत्पत्तिविनाशरहितत्वं घण्टाघोषेण स्थापितमस्ति । वेदे 'तम: परेदेवे एकी भवति' इति एकीभाव एवोक्तं न तु साक्षाल्लय: । 'गौरनाद्यन्तवती सा जनित्री भूतभाविनी', 'अविनाशी वा अरेऽयमात्मा'[151] इत्यादिश्रुतिवाक्यै:, 'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि[152] । अचेतना परार्था च नित्या सततविक्रिया' 'नित्य: सर्वगत: स्थाणु: अचलोयं सनातन'[153] इत्यादिश्रुतिविद्भि: व्यासपराशरादिभिर्वाक्यैरपि प्रधानजीवयोरुत्पत्तिविनाशरहितत्त्वमुक्तम् । अतो तमस एकीभाव: ब्रह्मणि संसर्गविशेषप्राप्तिरिति ज्ञायते ।

तर्हि 'पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि' इत्यस्य स्मृतिवाक्यस्य का गतिरितिचेत् तत्तु अयस्तोयनीत्या नेय इति देशिका: । यथा तोयस्य अयसि लय: पृथक्प्रतिपत्त्यनर्हसंसर्गविशेषरूप एव तथैव अत्रापि द्रष्टव्य: । आयुधरूपे अयसि तोयं तोयरूपेणैवावतिष्ठते । **'भोक्ताभोग्यप्रभृतिकवचितात्** भोक्ता जीव: भोग्यं प्रकृति: प्रभृतिशब्देन कालो विवक्षित इति सूक्ष्मचिदचिद्विशिष्टतया उपादानकारणभूतात् कालविशिष्टतया सहकारिकारणभूतात् सङ्कल्पाश्रिततया निमित्तकारणभूताच्च परमात्मनोऽसौ विश्वसृष्टि: समीची इत्यर्थ'[154] इति पदयोजना व्याख्याने विवृतमस्ति ।

---

[150] अधि.सा.१४८

[151] बृ.उ.४-५-१४

[152] भ.गी.१३-१९

[153] भ.गी.२-२४

[154] अधि.सा.पदयोजना.१४८

अत्र द्विविधो लयः विवक्षितः । प्रथमः पृथिव्यादि तमःपर्यन्तानां तत्तत्कारणे लयः यत् स्वावस्थाप्रहाणपूर्वकपूर्वावस्थाप्राप्तिः । अत्र लयशब्दस्य पूर्वावस्थाया नाश इत्येवार्थः । द्वितीयस्तु तमसः परेदेवे एकीभावरूपलयः यत् स्वावस्थाप्रहाणमन्तरेण पूर्वावस्थाप्राप्तिः । तत्तु प्रकृतिपुरुषयोः परमात्मनि लये वस्त्वन्तरविभागानर्हसंसर्गविशेषप्राप्तिरेव । यथा वृक्षेषु पक्षिणो लीयन्त इति लोके उच्यते तथैव । तेनैव प्रधानपुरुषयोः नामरूपविभागानर्हसूक्ष्मरूपेण प्रलये सत्त्वं सृष्टौ च प्रधानस्य स्थूलरूपेण महदादिभूतपर्यन्तपरिणामः जीवस्य ज्ञानसङ्कोचविकासरूपपरिणामः, तयोः परमात्मन अपृथक्सिद्धविशेषणतया सर्वदा अवस्थितिः सर्वमुपपन्नं भवति । परमात्मनस्तु सदैकरूपत्वम् अविकारित्वं चिदचित्प्रकारत्वं सर्वमुपपन्नं भवति ।

८.१० द्रव्ययोरपि चिदचितो: ब्रह्मोपादानकत्वमुपपद्यते[155]

८.१०.१ आक्षेप: - विशेषणीभूतयो: चेतनाचेतनयो: अविकारी ईश्वर: नोपादानम्

चेतनाचेतनविशिष्टं ब्रह्म उपादानमिति यदुपपादितं तत्र चेतनाचेतनयो: ब्रह्मस्वरूपान्तर्गतत्वम् उत न ? स्वरूपान्तर्गतत्वपक्षे ब्रह्मण: स्वरूपविकारो अङ्गीकरणीय: । यदि न तर्हि चेतनाचेतने गुणावेव भवत: । अपितु लोके तयो: द्रव्यत्वं प्रसिद्धमेव ।

८.१०.१.१ यदि चेतनाचेतने गुणावेव भवत: तर्हि कार्यस्य कारणे असत्त्वात् कारणात् सद्रव्यात् भिन्नाच्च एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपरोध: प्रसज्यते । न हि गुणस्य ज्ञानात् द्रव्यज्ञानसम्भव:।

८.१०.१.२ चेतनाचेतनयो: ब्रह्मविशेषणत्वमिति वादोऽपि लोके कुत्रापि द्रव्यस्य विशेषणत्वस्यादृष्टत्वात् नोपपद्यते । तत्रापि द्रव्यस्य अपृथक्सिद्धविशेषणत्वम् असम्भव एव ।

८.१०.२ परिहार: - विशेषणीभूतयो: चेतनाचेतनपदार्थयो: ब्रह्मोपादानकत्वसमर्थनम्

वेदार्थसङ्ग्रहे भगवद्रामानुजाचार्यै: 'बहुस्यां प्रजायेय' इत्यस्य व्याख्यानावसरे 'तस्यैवेश्वरस्य कार्यतया कारणतया च

---

[155] वे.सं.१८०, त.मु.क.ना.१७२

नानासंस्थानसंस्थितस्य संस्थानतया चिदचिद्वस्तुजातम् अवस्थितम्'[156] इत्युक्तम् । अनेन ब्रह्मण: बहुस्त्वादिकं सद्वारकमेवेत्युक्तं भवति । संस्थानतया इत्यस्य अपृथक्सिद्धधर्मतया इत्यर्थ: । विशिष्टं वस्तु ब्रह्मैकमेव कार्यकारणावस्थाद्वयान्वितमिति कार्यकारणयोरनन्यत्वसिद्धिरिति । अत्र आक्षेपस्तु अपृथक्सिद्धविशेषणत्वं 'घट: शुक्ल:, पट: शुक्ल:' इत्यादिषु जातिगुणयोरेव दृष्टं न द्रव्यस्य । अतो गोत्वादितुल्यतया चिदचिद्विशिष्टपदार्थस्य ईश्वरप्रकारत्वम् अयुक्तमिति ।

अत्रोत्तरमेवं दीयते । 'देवदत्तो मनुष्यो जात: पुण्यविशेषेण', 'यज्ञदत्तो गौर्जात: पापेन कर्मणा' इत्यादिषु भूतसङ्घातरूपतया द्रव्याणां मनुष्यादिशरीराणां मनुष्यत्वादिसंस्थानविशिष्टानां चेतनप्रकारतया लोकवेदयो: प्रतिपादनं प्रसिद्धमेव । चिदचितो: द्रव्यभूतयो: ब्रह्मविशेषणतयैव सद्भाव: तदपृथक्सिद्धप्रकारत्वं च सिद्ध्यति । अतो ईश्वरशरीरत्वेन चिदचितो: तत्प्रकारतयैव स्वरूपसद्भाव इति सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणं स्थूलचिदचिद्विशिष्टं ब्रह्म कार्यमिति विशेषणीभूतयो: चेतनाचेतनपदार्थयोरपि ईश्वरोपादानकत्वं सम्भवत्येव ।

श्रीवेदान्तदेशिका: ब्रह्मणो विशिष्टस्वरूपत्वं सर्वैरभ्युपगतमिति प्रतिपादयन्ति –

साविद्यं केऽपि सोपाधिकमथ कतिचिच्छक्तिभिर्जुष्टमन्ये

---

[156] वे.सं.१७०

स्वीकृत्यैकाद्वितीयश्रुतिमपि जगदुस्तद्विशिष्टैक्यनिष्ठाम् ।

नित्यत्वं विग्रहत्वं प्रकृतिपुरुषयोर्हेतुतां विश्वकर्तुः

तद्वैशिष्ट्यं च शास्त्रप्रथितमजहतां कोऽपराधोऽतिरिक्तः[157] **॥ इति ।**

केचन अविद्याविशिष्टं ब्रह्मेति, केचन अविद्या उपहितं ब्रह्मेति, अन्ये शक्तित्रयविशिष्टं ब्रह्मेति च 'एकमेवाद्वितीयम्' इत्येकत्वावधारणश्रुतिवाक्यं प्रतिपादितवन्तः । अस्मन्मते तु यथाशास्त्रं प्रकृतिपुरुषयोर्नित्यत्वम् ईश्वरशरीरत्वम्, विश्वकर्तुः परमात्मनो जगत् प्रति अभिन्ननिमित्तोपादानत्वम्, परमात्मनः चिदचिद्विशिष्टत्वम् इत्यादि वेदाख्यशास्त्रानुसारेणैव यत् प्रतिपादितं तत्र कोऽपराधः कृत इति । अर्थात् वयं सर्वशास्त्रसमन्वयं कृतवन्त इति एष आक्षेपः परिहृतो भवति ।

८.११ नित्यविभूतेः नित्यतया ब्रह्मणविशेषणत्त्वात् न प्रतिज्ञोपरोधः[158]

८.११.१ आक्षेपः - नित्यविभूतेः सृष्ट्यभावात् तस्या ईश्वरस्य नोपादानकत्वम्

एकविज्ञानेन सर्वविज्ञानमिति यदुक्तं तत् नित्यविभूत्याः कार्यत्वे सत्येव उपपद्यते । सिद्धान्ते तु तथा नाङ्गीक्रियत इति पुनः प्रतिज्ञोपरोधप्रसङ्गः ।

---

[157] त.मु.क.ना.१७२

[158] वे.सं.३७१, मु.उ.भा.२४८

८.११.२ परिहार: - नित्यविभूते: सृष्ट्यनन्तर्भावात् तस्या नोपादेयत्वम्

एकविज्ञानेन सर्वविज्ञानमिति यदुक्तं तत्तु सर्वस्य उपादेयत्वाभ्युपगमे सिद्ध्यति । अत एव 'प्रतिज्ञाऽहानिरव्यतिरेकात्'[159] इतिसूत्रभाष्ये वियदादेरपि ब्रह्मकार्यत्वमभ्युपगतम् । तर्हि नित्यविभूतेरपि 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति एकत्वावधारणात् उपादेयत्वमभ्युपगन्तव्यमिति पूर्व: पक्ष: ।

अत्रोच्यते यथा ज्ञानबलैश्वर्यादीनां गुणानाम् कारणभूतपरब्रह्मस्वरूपान्तर्भूतत्वात् एकत्वावधारणं तद्वदेव नित्यविभूतेरपि कल्याणगुणैकदेशत्वात् अप्राकृतविशेषणैकदेशत्वात् तेषां नोपादेयत्वम् । यथा ज्ञानादे: द्रव्यत्वे सत्यपि गुणवत्वं तथैव नित्यविभूतेरपि नित्यविशेषणत्वम् उपपद्यते । प्रपञ्चस्यापि विशेषणत्वमस्ति अतो अत्र को विशेष इत्याकाङ्क्षायां कल्याणगुणैकदेशत्वमेव इत्युक्तम्, प्रपञ्चस्य प्राकृतत्वात् न तथा । 'सदा पश्यन्ति सूरय'[160] इति श्रुतिप्रमाणेन तत्रस्थानाम् अकर्मवश्यत्वं ज्ञायते । अतो तेषां न सृष्टिविषयत्वम् । अत्र श्रीरङ्गरामानुजमिनिभि: एवमुक्तम् – 'यदि नित्यपदार्थान्प्रति उपादानत्वलक्षणात्मत्वं परमात्मनो वक्तव्यमिति निर्बन्ध: तर्हि तान् प्रति आत्मत्वम् उपादानत्वैकदेशभूतम् अपृथक्सिद्धाश्रयत्वमेव तत्राऽत्मशब्दप्रवृत्तिनिमित्तमस्तु । इतरत्र उपादानत्वलक्षणात्मत्वम् । एतद्रूपं चाऽत्मत्वं तज्जत्वादिभिरुपपाद्यमिति नानुपपत्ति: । ततश्चोपादाने ज्ञाते

---

[159] ब्र.सू.२-३-५

[160] सु.उ.६

तदपृथक्सिद्धमुपादेयमपि ज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञानमुपपन्नं भवति'[161] इति ।

८.१२ 'एकत्वे सति नानात्वं नानात्वे सति चैकता'[162] इत्येतत् ब्रह्मण्येवोपपद्यते[163]

८.१२.१ आक्षेपः - ब्रह्मपरिणामः, एकत्वावधारणञ्च कथम् उपपद्यते

ननु 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'[164], 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत'[165] इत्यादिश्रुतिषु ब्रह्मपरिणामो भेदनिषेधश्च दृश्यते । कथमेतत् उपपद्यत इत्याक्षेपः ।

८.१२.२ परिहारः - चिदचिद्विशिष्टं ब्रह्म एकमेव; विशेषणमुखेन परिणामः

श्रीभाष्ये महासिद्धान्ते एवमुक्तमाचार्यैः - 'कृत्स्नस्य जगतः ब्रह्मकार्यतया तदन्तर्यामिकतया च तदात्मकत्वेनैक्यात् तत्प्रत्यनीकनानात्वं निषिध्यते'[166] इति । अत्र श्रुतप्रकाशिकायां प्रथमं जगत इति पदस्य ब्रह्मपर्यन्तत्वमिति व्याख्यातम् । तस्य ब्रह्मकार्यतया ऐक्यादिति चान्वयः कृतः । तदन्तर्यामिकतयेत्यत्र जगत इति पदस्याध्याहारो

---

[161] मु.उ.भा.पु.२५०

[162] वे.सं.२०१

[163] श्री.भा.१-१-१, श्रु.प्र.१-१-१, उपादानत्वविचारः.पु.१८

[164] छा.उ.६-८-४

[165] छा.उ.३-१४-१

उक्तः । एवं सकृत्प्रयुक्तस्य जगच्छब्दस्य निष्कर्षकानिष्कर्षकत्वविरोधः परिहृतः । अपिच 'सर्वं खल्विदं ब्रह्म तज्जलान्' इत्युक्तं जगतः तज्जत्वं तल्लत्वं चोपजीव्याह ब्रह्मकार्यतयेति । तच्छब्दो विशेष्यपरामर्शी । चिदचिद्विशिष्टे प्रकृते विशेष्यांशस्यापि प्रकृतत्वात् । यथा 'सन्मूलास्सदायतनाः'[167] इत्यत्र सच्छब्दस्य विशिष्टपरत्वं विशेष्यपरत्वं च तद्वत् । एवं तज्जलानिति वाक्यमुपजीव्योक्तं जगतो ब्रह्मकार्यतया तदन्तर्यामिकतयाचेति तदन्तर्यामिकत्वम् उभयलिङ्गकस्य ब्रह्मणः परमार्थजगदुपादानत्वान्यथानुपपत्तिसिद्धं घटकश्रुतिसिद्धं[168] च । चशब्दस्योत्तरत्रान्वयः । तदन्तर्यामिकतया तदात्मकत्वेन चैक्यादिति । एवमुभयविधैक्यस्य विहितत्वादित्यर्थः' इति ।

पश्चात् तस्य वाक्यस्यैव द्वितीययोजना कृता एवम् - 'यद्वा कृत्स्नस्य जगत इति निष्कर्षकः शब्दः । ब्रह्मशब्दोऽपि विशेष्यमात्रपरः । कार्यावस्थां प्रत्याधारत्वात् । आधारत्वं च साक्षाद्वा परंपरया वा मुख्यमेव । अतो ब्रह्मकार्यं जगत् । एवं ब्रह्मकार्यतया तदन्तर्यामिकतया च जगत् तदात्मकम् । तदात्मकत्वं नाम जगतः तत्प्रकारैकस्वभावतया पृथगवस्थानाभावात् तदन्तर्गतत्वम् । तेन प्रकारेणैक्यं न तु स्वरूपैक्यम् । विशिष्टान्तर्भाव ऐक्यमित्यर्थः'[169] इति । एतस्य अभिप्राय इत्थं परिष्कृतं नावल्पाक्कं श्रीनृसिंहतातयार्यमहादेशिकैः - 'तथा च

---

[166] श्री.भा.१-१-१

[167] छा.उ.६-८-४

[168] बृ.उ.३-७-७..२७

[169] श्रु.प्र.१-१-१

कृत्स्नजगदवच्छिन्नब्रह्मनिष्ठकार्यताप्रयोज्यैक्यात् । जगन्निष्ठब्रह्मशरीरत्वरूपब्रह्मात्मकत्वप्रयोज्यैक्याच्चेत्यर्थ'[170] इति । अत्र एक आक्षेप: सूक्ष्मचिदचिद्विशिष्टब्रह्मण: स्थूलचिदचिद्विशिष्टब्रह्म प्रत्येव उपादानतया तदुपादेयत्वं विशिष्टस्यैव न विशेषणस्य स्थूलजगत इति कथं जगत इति पदस्य निष्कर्षकत्वमिति । अस्य परिहारो 'तदुपादेयत्वं तज्जन्यावस्थाश्रयत्वमेव यथा घटस्य मृत्पिण्डोपादेयत्वं मृत्पिण्डजन्यावस्थाश्रयत्वम् तथैव ब्रह्मोपादेयत्वं ब्रह्मजन्यावस्थाविशेषाश्रयत्वमिति । तादृशरूपब्रह्मोपादेयत्वस्य केवले जगत्यपि सत्त्वात् जगच्छब्दस्य निष्कर्षकत्वेऽपि न क्षतिरिति'[171] उक्तम् ।

एवं ब्रह्मपरिणामो एकत्वावधारणं च विवृतं भवति । अयमेव परिष्कृतपरिणामवाद इति कथ्यते ।

८.१३ शरीरभूतयो: चिदचितो: परिणामेऽपि ब्रह्मण उपादानत्वं मुख्यमेव[172]

८.१३.१ आक्षेप: - प्रकृतिपुरुषयो: व्यवहितत्वात् तयोर्विशिष्टस्य ईश्वरस्य उपादानममुख्यमेव

व्यासार्यै: (सुदर्शनसूरिभि:) यदुक्तं 'प्रकृतिपुरुषा यदि ब्रह्मस्वरूपे नान्तर्गता: तथापि ब्रह्मण उपादानत्वं मुख्यमेव'[173] इति तत् कथं भवति ? व्यवहितानां कार्ये उपादानत्वं न दृष्टं खलु लोके कुत्रापि ? यद्यपि कार्ये हेतुत्वं तथापि

---

[170] उपादानत्वविचार:.पु.१८

[171] उपादानत्वविचार:.पु.१७

[172] श्रु.प्र.१-४-२३, मु.उ.भा.२३८

[173] श्रु.प्र.१-४-७

तदमुख्यमेव भवतीति एतत् मुख्यत्वप्रतिपादनं न प्रामाणिकम् ।

८.१३.२ परिहार: - प्रकृतिपुरुषयो: स्वरूपानन्तर्भावेऽपि ब्रह्मण उपादानत्वं मुख्यमेव

यदुक्तं ब्रह्मणो महदाद्युपादानत्वं शरीरद्वारकमिति तत्कथं मुख्यं भवतीति आक्षेप: । उपादानस्य कार्यावस्थाश्रयत्वमङ्गीकृतम् अस्ति । अपितु व्यवहितस्य अवस्थाविशेषं प्रत्याश्रयत्वं कथम् इति । अत्रोच्यते लोके अव्यवहितादपि व्यवहितस्यैव मुख्यत्वं दृश्यत इति । यथा पर्यङ्कस्योपरि वर्तमानस्य अंशुकस्येव । यद्यपि अंशुकस्याव्यवहितत्वं तथापि तन्न पुरुषस्य धारकमपितु व्यवहितस्य पर्यङ्कस्यैव धारणे मुख्यत्वम् । तथैव कूपाच्छादकदर्भा: पुरुषधारणे न समर्था:, भूतलस्यैव व्यवहितस्य धारणसामर्थ्यं दृश्यते । एवमेव परमात्मन: सर्वशक्ते: सर्वावस्थाश्रयत्वसामर्थ्यात् जगदुपादानत्वं मुख्यमेव भवति ।

८.१४ सर्वनियामक: सर्वशेषी परमात्मैव कृत्स्नस्य जगत: मुख्यम् उपादानम्[174]

८.१४.१ आक्षेप: - कालादयोऽपि उपादानमिति प्रमाणसत्त्वात् ईश्वर एव सर्वस्य नोपादानम्

श्वेताश्वतरे यत् श्रूयते 'काल: स्वभावो..'[175] इति मन्त्रे तत्प्रकारेण कालादीनामपि कारणत्वं भवत्येव । मुक्तावल्यां

---

[174] सपरि.श्वे.उ.भा.पु.३४९

[175] श्वे.उ.१-२

'जन्यानां जनक: काल:'[176] इत्युक्तं च । अतो ब्रह्मण एव जगत्कारणत्वं नान्येषामिति वादे किं मानम् ?

८.१४.२ परिहार: - कालादीनां नोपादानत्वम्

श्वेताश्वतरे श्रूयते

'काल: स्वभावो नियतिर्यदृच्छा भूतानि योनि: पुरुष इति चिन्त्यम् ।
संयोग एषां न त्वात्मभावात् आत्माप्यनीश: सुखदु:खहेतो:[177] **॥ इति ।**

प्रथममन्त्रे किं कारणं ब्रह्म इति यदुक्तं तस्य लोके केचित् काल एव सर्वकारणमिति वदन्ति । लोकायतिका: स्वभाव एवेति मीमांसकास्तु नियतिलक्षणं कर्मेति अपरे यादृच्छिकत्वम् वदन्ति । केचित् पञ्चभूतानीति अपरे प्रकृतिं केचित्तु पुरुषमिति कुतो एतेषामन्यतम: पक्ष इत्येतत् युक्तं नवेति चिन्त्यम् ।

एतत् श्रीउत्तमूर् वीरराघवाचार्याणां श्वेताश्वतरोपनिषद्भाष्यविवरणे प्रपञ्चितम्[178] ।

कालस्य इदानीं जायते तदानीं नश्यतीति जन्मनाशावच्छेदकतयैव प्रतीति: । अपितु ब्रह्मस्वरूपप्रश्ने 'क च संप्रतिष्ठा' इत्यपि लक्षणमुक्तं प्रथम मन्त्रे । तत्तु लयाधारत्वं कालस्याभावात् काल: नोपादानमिति सिद्धं भवति । यदि कालस्य विशेषणतया सर्वत्र प्रतीते: कार्याभिन्नत्वलक्षणमुपादानत्वमस्ति इति वादोऽपि सर्वदा

---

[176] कारिकावली-४५

[177] श्वे.उ.१-२

सर्वकार्योत्पत्तिप्रसङ्गात् न सहः ।

स्वभावोऽपि न कारणम् । स्वभाव इति चेत् कार्यस्य वा करणस्य वा स्वभाव इति प्रश्ने न कार्यस्य । कार्यस्वभावस्य कार्यनियतपूर्ववृत्तित्वाभावात् । कारणस्य स्वभावो यथा घटस्य मृदादिरिति चेत् अचेतनस्य मृदादेः स्वतन्त्रेण कारणत्वाभावात् तदपि न सङ्गच्छते ।

यतोऽवश्यं भवति सा नियतिः पुण्यपापात्मकं कर्मेति केचित् । सा तु अचेतना धर्मभूता धर्मिभूतचेतनाचेतनसर्वोत्पत्तिलयस्थानं न स्वतन्त्रं च भवितुमर्हति इति आचार्याः ।

यदृच्छाकारणपक्षे कारणं किमित्येव नोऽक्तं भवतीति तदपि न घटते ।

भूतान्यपि अचेतनत्वात् न स्वतन्त्रेण कारणं भवितुमर्हन्ति । आत्माप्यनीशः सुखदुःखहेतोरित्यस्य आत्मा स्वस्य दुःखार्थं स्वयं न किञ्चित् सृजति खलु सर्वेषामपि सुखमेवेप्सितत्वात् ।

---

[178] सपरि.श्वे.उ.पु.३४९

एतस्य चिन्तनप्रकारस्य 'चिन्त्यम्' इत्युक्त्वा तृतीयमन्त्रे 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिम्'[179] इति अपहतपाप्मत्वादि-अनन्तकल्याणगुणविशिष्टस्य नारायणस्य जगदुपादानत्वं प्रतिपादयति भगवती श्रुतिः । अस्य मन्त्रस्य व्याख्यानं श्रीरङ्गरामानुजमुनिभिरेवं कृतम् – 'एवं ध्यानयोगयुक्ता मुनयः 'अपहतपाप्मा दिव्यो देव एको नारायणः'[180] इति श्रुतिप्रसिद्धदेवशब्दितनारायणात्मिकां कार्योपयोगि-अपृथक्सिद्धविशेषणत्वेन शक्तिशब्दितां सत्त्वरजस्तमोलक्षणस्वगुणोपेतां ब्रह्मणो जगत्कारणत्वनिर्वाहिकां प्रकृतिं दृष्टवन्त इत्यर्थः । ततःपरं तच्छरीरक-सर्वविधकारणं सकलकारणाधिष्ठितारं समाभ्यधिकशून्यं परमात्मानमपि दृष्टवन्त इत्याह यः कारणानीति'[181] इति ।

[179] श्वे.उ.१-३

[180] सु.उ.७

[181] सपरि.श्वे.उ.पु.३५१

९.० ब्रह्मणो अभिन्ननिमित्तोपादानत्वस्य समर्थनम्

भगवद्बादरायणै: ब्रह्मसूत्रेषु ब्रह्मणो जगत् प्रति उपादानकारणत्वं निमित्तकारणत्वं च प्रथमाध्याये चतुर्थपादे प्रकृत्यधिकरणे षड्भि: सूत्रै: प्रतिपादितमस्ति । तदनुसृत्यैव अत्र जगत् प्रति ब्रह्मणो अभिन्ननिमित्तोपादानत्वसमर्थनं क्रियते ।

९.१ प्रतिज्ञादृष्टान्तानुपरोधात् ब्रह्मैव जगदुपादानं निमित्तं च

'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्'[182] इत्यस्य प्रथमसूत्रस्य व्याख्याने प्रकृतिश्च इति पदस्य 'उपादानं च' इत्यर्थ: प्रतिपादित: श्रीभाष्यकारै: । न केवलं निमित्तकारणं ब्रह्म उपादानकारणं च ब्रह्मैव इत्यर्थ इत्युकतं तै: प्रतिज्ञादृष्टान्तानुपरोधात् इति हेतो: । अस्य अधिकरणस्य विषयवाक्यं छान्दोग्ये श्रूयमानं 'उत तमादेशमप्राक्ष्य: येन अश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञात'मिति[183] आचार्यौद्दालकेन श्वेतकेतुं प्रति कृतो प्रश्न: । प्रतिज्ञा तु एकविज्ञानेन सर्वविज्ञानविषया । एतत् कथमिति अजानत: श्वेतकेतो: स्पष्टीकरणार्थं दृष्टान्तमपि दत्तवानाचार्य: 'यथा

[182] ब्र.सू.१-४-२३

[183] छा.उ.६-१-३

सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'[184] इति । अस्य अभिप्रायस्तु कारणविज्ञानात् कार्यविज्ञानविषय एव । पुनः कृत्स्नस्य जगतो ब्रह्मैककारणतामजानन् श्वेतकेतुः पितरं पृच्छति 'भगवान्स्त्वेव मे तद्ब्रवीतु" इति । तत उद्दालकः ब्रह्मैव सर्वकारणमिति उपदिशति 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्'[185] इति । अत्र अग्र इति सृष्टेः पूर्वकालमभिप्रेतम् इदमिति पदेन जगत् निर्दिष्टम् । सृष्टेः पूर्वकालेऽपि जगतः सदात्मकता 'सदेव' इति प्रतिपादिता भवति । अस्य वाक्यस्यान्वयः 'सदेव-इदम्-अग्रे-एकमेव-आसीत्' इति तात्पर्यदीपिकायां[186] व्याख्यातम् । सृष्टेः पूर्वकाले जगतो अविभक्तनामरूपप्रतिपादनमुखेन सच्छब्दवाच्यस्य ब्रह्मणो जगदुपादानत्वं प्रतिपादितम् । यद्यपि ब्रह्मैव उपादानं तथापि एकविज्ञानेन सर्वविज्ञानम् अनुपपन्नं निमित्तकारणस्य भिन्नत्वात् इति आशङ्कां परिहरन् अद्वितीय पदेन ब्रह्मव्यतिरिक्तनिमित्तकारणं प्रतिषिद्धम् इत्युपदिशति ।

'उत तमादेशमप्राक्ष्यो येन अश्रुतं श्रुतं भवति' इत्यत्र आदेश श्ब्दस्य आदिश्यते प्रशिष्यते अनेन इत्यादेशः प्रशासनम् इत्यर्थः । अत्र आचार्यैः 'तमादेष्टारमप्राक्ष्यो येनाश्रुतं श्रुतं भवति – येनादेष्ट्राधिष्ठात्रा श्रुतेनाश्रुतमपि श्रुतं भवतीति निमित्तोपादानयोः ऐक्यं प्रतीयते । 'सदेव सोम्येदमग्र आसीत् एकमेव' इति प्राक्सृष्टेरेकत्वावधारणात्

---

[184] छा.उ.६-१-४

[185] छा.उ.६-२-१

[186] वे.सं.पु.३५

अद्वितीयपदेन अधिष्ठात्रन्तरनिवारणाच्च'[187] इति व्याख्यातम् श्रीभाष्ये ।

अपिच तत्त्वानां ब्रह्मण्येव प्रलय आम्नायते सुबालोपनिषदि 'पृथिवी अप्सु प्रलीयते, आपस्तेजसि लीयन्ते, तेजो वायौ लीयते, वायुराकाशे लीयते, आकाशम् इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ लीयन्ते, भूतादिर्महति लीयते, महान् अव्यक्ते लीयते, अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयते, तमः परेदेवे एकी भवति'[188] इति । अत्र एकीभाव एव श्रूयते न तु साक्षाल्लय इति प्रकृतिपुरुषयोः सृष्टेः पूर्वकाले नामरुपविभागानर्हसूक्ष्मरूपेणावस्थितिः ब्रह्मण एव अभिन्ननिमित्तोपादानत्वं च सङ्गच्छते ।

९.२ अभिध्योपदेशाच्च ब्रह्मैव जगदुपादानं निमित्तं च

प्रकृत्यधिकरणे 'अभिध्योपदेशाच्च'[189] इति द्वितीयसूत्रे ब्रह्मणः स्वस्यैव बहुभवनसङ्कल्पोपदेशाच्च सकलजगत्कारणत्वमुपपन्नमिति बादरायणैः स्थापितम् । एतस्य प्रमाणानि च 'तदैक्षत बहुस्यां प्रजायेय'[190],

[187] श्री.भा.१-४-२३

[188] सु.उ.२

[189] ब्र.सू.१-४-२४

[190] छा.उ.६-२-३

'सोऽकामयत । बहुस्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्चत्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत्'[191] 'तदात्मानं स्वयमकुरुत'[192] इत्यादीनि । एतदुक्तमाचार्यैः - 'तदेतत् सच्छब्दवाच्यं परं ब्रह्म सर्वज्ञं सर्वशक्ति सत्यसङ्कल्पं अवाप्तसमस्तकाममपि लीलार्थं विचित्रानन्तचिदचिन्मिश्रजगद्रूपेण अहमेव 'बहुस्यां', तदर्थं 'प्रजायेय' इति स्वयमेव सङ्कल्प्य, स्वांशैकदेशादेव वियदादि भूतानि सृष्ट्वा, पुनरपि सैव सच्छब्दाभिहिता परादेवता एव ऐक्षत, 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि'[193] इति । 'अनेन जीवेनात्मना इति जीवस्य ब्रह्मात्मकत्वं प्रतिपाद्य ब्रह्मात्मक-जीवानुप्रवेशादेव कृत्स्नस्य अचिद्वस्तुनः पदार्थत्वम् एवं भूतस्यैव अचिद्वस्तुनो नामरूपभाक्त्वम् इति च दर्शयति'[194] इति ।

९.३ साक्षाच्चोभयाम्नानाच्च ब्रह्मैव जगदुपादानं निमित्तं च

ब्रह्मणो अभिन्ननिमित्तोपादानत्वं न केवलं प्रतिज्ञादृष्टान्ताभिध्योपदेशादिभिरपितु साक्षादाम्नायत इति तृतीये सूत्रे

---

[191] तै.उ.२-६

[192] तै.उ.२-७

[193] छा.उ.६-३-२

[194] वे.सं.पु.३७

भगवद्बादरायणै: 'साक्षाच्चोभयाम्नानात्'[195] इत्युक्तम् । 'किं स्विद्वनं क उ स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षु: । मनीषिणो मनसा पृच्छतेदुतत् यदध्यतिष्ठत् भुवनानि धारयन्'[196], 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षु: । मनीषिणो मनसा विब्रवीमि व: ब्रह्माध्यतिष्ठत् भुवनानि धारयन्'[197] इति प्रश्नप्रतिवचनाभ्यां ब्रह्मण एव सकलजगत्कारणत्वमुक्तम् । अत्र वनमित्यस्य अधिकरणमिति वृक्षशब्दस्य उपादानमितिच अर्थ: । यदध्यतिष्ठत् इत्यस्य उपकरणादिकं किमित्यर्थ: । प्रतिवचने ब्रह्मैव अधिकरणम् उपादानम् उपकरणादिकं चेति उक्तम् । श्रीकुमारवरदाचार्यै: चिन्तामणिव्याख्याने 'ब्रह्म वनमुपादानम् । ब्रह्म स वृक्ष इति ब्रह्मैवोपकरणमित्यर्थ: । निमित्तत्वं सिद्धमिति कृत्वा श्रुतिरुपादानत्वं सहकारित्वं च साक्षात् स्वयमेवाह'[198] इति व्याख्यातम् । उभयथापि ब्रह्मण: सकलजगत्कारणत्वं स्पष्टं भवति।

९.४ आत्मकृतेरिति हेतोश्च ब्रह्मैव जगदुपादानं निमित्तं च

'तदात्मानं स्वयमकुरुत' इति सिसृक्षो: ब्रह्मण एव कर्मत्वं कर्तृत्वं च श्रूयते । आत्मन एव बहुत्वकरणात् तस्यैव

---

[195] ब्र.सू.१-४-२५

[196] तै.ब्रा.२-८-७

[197] तै.ब्रा.२-८-८

[198] अधि.सा.चि.१४६

निमित्तोपादानत्वं प्रतीयत इति 'आत्मकृते:'[199] इति चतुर्थसूत्रे बादरायणैरुक्तम् । अत्र 'अविभक्तनामरूप आत्मा कर्ता । स एव विभक्तनामरूप: कार्यमिति कर्तृत्वकर्मत्वयो: न विरोध'[200] इति आचार्या: ।

९.५ परिणामाच्च ब्रह्मैव जगदुपादानं निमित्तं च

प्रकृत्यधिकरणे पञ्चमे सुत्रे भगवद्बादरायणै: 'परिणामात्'[201] इति हेतोश्च ब्रह्मणो अभिन्ननिमित्तोपादानत्वम् उपपद्यत इति प्रतिपादितमस्ति । परिणामादित्यस्यार्थ: परिणामस्वाभाव्यादिति । कीदृश: परिणामो निरस्तनिखिलदोषे ब्रह्मणि सम्भवतीति आकाङ्क्षायां भगवद्रामानुजाचार्यै: व्याख्यातमित्थम् – 'एवमेव हि परिणाम उपदिश्यते – अशेषहेयप्रत्यनीक-कल्याणैकतानं स्वेतरसमस्तवस्तुविलक्षणं सर्वज्ञं सत्यसङ्कल्पम् अवाप्तसमस्तकामम् अनवधिकातिशयानन्दं स्वलीलोपकरणभूत-समस्तचिदचिद्वस्तुजातशरीरतया तदात्मभूतं परंब्रह्म स्वशरीरभूते प्रपञ्चे तन्मात्राहङ्कारादि-कारणपरम्परया तमश्शब्दवाच्य-अतिसूक्ष्म-अचिद्वस्त्वेकशेषे सति, तमसि च स्वशरीरतयाऽपि पृथक्-निर्देशानर्ह-अतिसूक्ष्मदशापत्त्या स्वस्मिन् एकतापन्ने सति, तथाभूततमश्शरीरं ब्रह्म, पूर्ववत् विभक्तनामरूप-चिदचिन्मिश्रप्रपञ्चशरीरं स्यामिति सङ्कल्प्य अप्ययक्रमेण जगच्छरीरतया आत्मानं परिणमयतीति

---

[199] ब्र.सू.१-४-२६

[200] श्री.भा.१-४-२६

[201] ब्र.सू.१-४-२७

सर्वेषु वेदान्तेषु परिणामोपदेश'[202] इति ।

एतस्य प्रमाणानि बृहदारण्यकोपनिषदि – 'य: पृथिव्यां तिष्ठन्.. यस्य पृथिवी शरीरम्',... 'यस्य विज्ञानं शरीरम्'[203] इत्यादय: काण्वपाठे, माध्यन्दिने पाठे विज्ञानस्य स्थाने 'यस्य आत्मा शरीरम्' इति च दृश्यते । अनुक्तमन्यतो ग्राह्यमिति न्यायात् सुबालोपनिषदि बृहदारण्यकोपनिषदनुक्तानां तत्त्वानामपि परमात्मन: शरीरत्वम् आत्मत्वं च 'यस्य बुद्धि: शरीरम्'[204] इत्यादौ श्रूयते ।

९.६ योनिश्च हि गीयते इति हेतोश्च

बादरायणै: प्रकृत्यधिकरणस्थे 'योनिश्च हि गीयते'[205] इति षष्ठसूत्रे यस्मात् ब्रह्म योनित्वेनापि वेदान्तेषु अभिधीयते 'कर्तारमीशं पुरुषं ब्रह्म योनिम्'[206] इति ततश्च जगदुपादानं निमित्तं चेति प्रतिपादितम् । अपिच मुण्डकोपनिषदि 'यद्भूतयोनिं परिपश्यन्ति धीरा'[207] इति श्रूयते । योनिशब्दस्य उपादानवाचकत्वं च तत्रैव उपनिषदि उक्तं

---

[202] श्री.भा.१-४-२७

[203] बृ.उ.५-७

[204] सु.उ.७

[205] ब्र.सू.१-४-२८

[206] मु.उ.३-१-३

[207] मु.उ.१-१-५

'यथोर्णनाभि: सृजते गृण्हते च यथा पृथिव्यामोषधय: सम्भवन्ति । यथा सत: पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्'[208] इति ।

एतत्सर्वं सङ्गृहीतं वेदान्तदेशिकैरित्थम् –

कार्यैक्ये हि प्रतिज्ञा तदनुगुण उदाहारि दृष्टान्तवर्ग:
स्त्रष्टु: स्यामित्यभिध्यां श्रुतिरिह वनतां वृक्षतादिं च वक्ति ।
आत्मानं चैष एव स्वयमकुरुत तद्भूतयोनित्वमुक्तं
तस्मात् कर्ताऽपि देव: प्रकृतिरपि भवेत् सर्वतत्त्वान्तरात्मा[209] **॥ इति ।**

कारणस्य ब्रह्मण: कार्यस्य जगतश्च अनन्यत्वे हि एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञा सम्भवति । उद्दालकै: मृदादि दृष्टान्तवर्गश्च तदनुगुण एव उदाहृत: । श्रुतिश्च स्त्रष्टु: परमात्मनो 'बहुस्याम्' इति सङ्कल्पपूर्वकसृष्टिं तस्यैव उपादानकारणत्वं सहकारिकारणत्वं च वनवृक्षशब्दै: 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत्' इति वक्ति । अपिच 'तदात्मानं स्वयमकुरुत' इति परमात्मा आत्मानमेव जगदाकारविशिष्टं स्वयं निरमिमीत । तथा श्रुत्या 'यद्भूतयोनिम्' इति परमात्मन एव सर्वभूतोपादानत्वरूपं योनित्वमुक्तम् । तस्मात् स एव परमात्मा सर्वतत्त्वानामपि अन्तरात्मभूत: **देव:** दिव् क्रीडायामिति केवललीलया जगत्सृजन् **कर्ताऽपि** निमित्तकारणमपि **प्रकृतिरपि** उपादानकारणमपि भवेदिति अस्मिन् श्लोके आचार्यै: प्रकृत्यधिकरणस्थानां षट्-सूत्राणामपि अर्थप्रतिपादनं कृतम् ।

---

[208] मु.उ.१-१-७

तत्त्वमुक्ताकलापे च आचार्यैरिदमुक्तम् –

निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी

तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः ।

तेजोऽबन्नाभिधेये बहुभवनमभिध्यानलिङ्गं च दृष्टं

तस्मादीशाननिघ्नाः प्रकृतिविकृतयः स्वस्वकार्यप्रसूतौ[210] **॥ इति ।**

अस्यार्थः स्पष्टमेवेति न विव्रियते । अत एव एतत् सिद्धान्तस्य सविशेषाद्वैतमिति विशिष्टाद्वैतमिति वा अभिधानं सार्थकं भवति । विशिष्टे अद्वैतम् इति विग्रहे कृते चिदचिद्विशिष्टः परमात्मा एक एवेति अर्थः सिध्यति । विशिष्टयोरद्वैतमिति कृते परमात्मैव कारणरूपं कार्यरूपं चेति अर्थो फलितो भवति । सर्वान्तर्यामित्वात् सर्वं तस्य शरीरभूतमिति स विश्वरूपी इति विश्रुतः श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धः । सर्वे प्रकृतिरूपा विकृतिरूपाश्च पदार्थाः परमात्माधीना एव स्वस्वकार्याणि निर्वहन्ति ।

इत्थमाचार्यैरस्मिन्विशिष्टाद्वैतदर्शने ब्रह्मणो जगत् प्रति अभिन्ननिमित्तोपादानत्वं सम्यक् श्रुतिस्मृतिप्रमाणैः समर्थितमस्ति ।

---

[209] अधि.सा.१४६

210 त.मु.क.जड.१६

१०.० उपसंहार:

अस्मिन् प्रबन्धे उपरितनप्रकरणेषु ब्रह्मणो जगत् प्रति अभिन्ननिमित्तोपादानत्वं कथं प्रतिपादितं विशिष्टाद्वैतशास्त्रे इति एकं सिंहावलोकनं कृतम् । अस्य प्रबन्धस्य उद्देशानुगुणम् एतस्य विषयस्य प्रतिपादनं पूर्वपक्षाणामाक्षेपा:, सिद्धान्ते तेषां समाधानानि, सिद्धान्तप्रतिपादनं समर्थनं च, इत्येते विषया विवृता: । ब्रह्मणो अभिन्ननिमित्तोपादानत्वं च अस्य विशिष्टाद्वैतदर्शनस्य असाधारणो विषय: । अस्य सिद्धान्तस्य सूक्ष्मपरीक्षणेन सर्वश्रुतिसामन्ञ्जस्यं कथमाचार्यै: साधितमिति स्पष्टमवगम्यत इत्थम् -

१. ब्रह्मणो अविकारित्वं सर्वशक्तित्वं सर्वज्ञत्वं सकलकल्याणगुणाकरत्वं निर्दोषत्वं सर्वं यथाश्रुतिप्रमाणं सुस्थम्

२. प्रकृतिपुरुषयो: नित्यत्वं श्रुतिस्मृतिप्रमाणानुगुणं स्वीकृतं परिरक्षितं च

३. प्रकृते: स्वरूपविकारो यत् श्रूयते तदपि तस्या: ब्रह्मात्मकत्वात् समर्थितम्

४. पुरुषस्य कर्मानुगुण्येन स्वभावविकाराङ्गीकारात् कर्मस्य च अनादित्वात् न श्रुतिप्रमाणहानि:

५. तत्त्वानां स्वकारणे लयो यत् श्रूयते तदपि अन्ते तमस: ब्रह्मणि एकीभावश्रुत्या अबाधितम्

६. सच्छब्दवाच्यस्य ब्रह्मण: सृष्टे: पूर्वकाले एकत्वावधारणं च प्रकृतिपुरुषयो: सूक्ष्मावस्थापन्नयो: सत्त्वात् सम्यक्कृतम्

७. सत्कार्यवादश्च श्रुतिसूत्रप्रमाणानुगुणं सम्यक्समर्थितम्

८. सर्वेषामपि श्रुत्यादिप्रमाणानां मुख्यार्थस्वीकारात् सर्वश्रुतिसामञ्जस्यं साधितम्

एवं रीत्या वेदप्रामाण्यं वेदपरिरक्षणं च सम्यक्कृतम् विशिष्टाद्वैतसिद्धान्तप्रवर्तकैराचार्यैरित्ययं महान्विषयः । एष प्रबन्धोऽस्य सिद्धान्तस्य अध्येतृणां तुलनात्मकसंशोधनकर्तृणां च प्रयोजनाय भवतीति आशास्तेऽयं संशोधकः ।

इतः परमपि एनं विषयमधिकृत्य विस्तृतसंशोधनं कर्तुं शक्यते । जगत्कारणत्वसम्बन्धिनो अनेके विषया अपि संशोधनीया वर्तन्ते । तेऽपि विषया एकविज्ञानेन सर्वविज्ञानप्रतिपादनम्, ब्रह्मणः सकलेतरविलक्षणत्वम्, इतर दर्शनानां कारणत्वप्रतिपादनस्य तुलनात्मकसंशोधनम्, विषयसम्बद्धस्य एकैकस्य श्रुतिवाक्यस्यापि विस्तृतपरीक्षणम् इत्यादयः । परमहंसेत्यादि श्रीमदभिनवरङ्गनाथब्रह्मतन्त्रस्वतन्त्रपरकालमहादेशिकानां श्रीभाष्यगूढार्थसङ्ग्रहे अनेके व्याख्यानग्रन्था विमर्शिताः सन्ति । भामती, श्रीशङ्करभाष्यम्, श्रीमदानन्दतीर्थभाष्यम्, सुधा, चन्द्रिका, अद्वैतसिद्धिः इत्यादिग्रन्थेषु जगत्कारणसम्बन्धिनो ये ये आशङ्काः वादाश्च उद्धृतास्ते सर्वे श्रीभाष्यगूढार्थसङ्ग्रहे परीक्षिताः सूत्तरा अपि । एतेषां विस्तृतविमर्शनात्मकम् अध्ययनमपि इतः परं कर्तुं शक्यते ।

एष प्रयत्नो अखिलहेयप्रत्यनीकस्य सकलकल्याणगुणाकरस्य सकलजगत्कारणस्य परब्रह्मणः श्रीमन्नारायणस्य प्रीतये भवत्विति सप्रश्रयं साञ्जलिबन्धं प्रार्थये । इति शम् ।

अनुबन्धा:

सङ्केताक्षरविवरणम्

ग्रन्थसूची

ब्रह्मणो अभिन्ननिमित्तोपादानत्वप्रतिपादने उपात्तानि प्रमुखश्रुतिस्मृतिप्रमाणानि

पदार्थकोष:

सङ्केताक्षरविवरणम्

अधि.सा. – अधिकरणसारावलि:

अधि.सा.चि. – अधिकरणसारावल्या: व्याख्या - चिन्तामणि:

अधि.सा.पदयोजना. – अधिकरणसारावल्या: व्याख्या – पदयोजना श्लोकसङ्ख्या, श्रिवण्शठकोपश्रीशठकोपरामानुजयतीन्द्रमहादेशिकै: विरचितम् – कुरुच्चि लक्ष्मीनृसिम्हाचार्येण प्रकाशिता कारिकावली- न्यायसिद्धान्तमुक्तावली-कारिकावली, चौकाम्बा प्रकाशनम्, २००८

कठ.उ. - कठोपनिषत्

कृ.य.ब्रा. - कृष्णयजुर्वेदब्राह्मणम्

कौ.उ. - कौषीतक्युपनिषत्

छा.उ. - छान्दोग्योपनिषत्

त.मु.क.जड – तत्त्वमुक्ताकलाप: जडद्रव्यसर:

त.मु.क.ना- तत्त्वमुक्ताकलाप: नायकसर:

तै.उ. - तैत्तिरीयोपनिषत्

तै.उ.भृ. – तैत्तिरीयोपनिषत् भृगुवल्ली

तै.उ.आ. – तैत्तिरीयोपनिषत् आनन्दवल्ली

तै.आर. – तैत्तिरीय आरण्यकम्

न्या.सि.जड.पु. – न्यायसिद्धाञ्जनम् - जडद्रव्यपरिच्छेद: पुटसङ्ख्या

न्या.सि.ई.पु. – न्यायसिद्धाञ्जनम् ईश्वरपरिच्छेद: पुटसङ्ख्या

पू.मी. – पूर्वमीमाम्सा सूत्राणि

ब्र.सू.-ब्रह्मसूत्राणि

बृ.उ.मा. – बृहदारण्यकोपनिषत् माध्यन्दिनपाठ:

बृ.उ. - बृहदारण्यकोपनिषत्

भ.गी. – भगवद्गीता

म.ना.उ. - महानारायणोपनिषत्

मन्त्रिक.उ. - मन्त्रिकोपनिषत्

मु.उ. - मुण्डकोपनिषत्

मु.उ.भा.पु – मुण्डकोपनिषद्भाष्यम्, पुटसङ्ख्या

या.स्मृ.प्रा.का. – याज्ञवल्क्यस्मृति: प्रायश्चित्तकाण्ड:

वि.पु. - विष्णुपुराणम्

वे.सं.पु. – वेदार्थसङ्ग्रह: पुटसङ्ख्या - श्रीमच्चन्नपुरी श्रीसरस्वतीभण्डारसभिकै: मुद्रापित:

श्वे.उ. - श्वेताश्वतरोपनिषत्

श्रीभा. - ब्रह्मसूत्रश्रीभाष्यम्, श्रीनृसिंहप्रिया ट्रस्ट्, चेन्नै, २००६

श्रु.प्र. – ब्रह्मसूत्रश्रीभाष्यम्, श्रीनृसिंहप्रिया ट्रस्ट्, चेन्नै, २००६

सपरि.श्वे.उ.पु. – सपरिष्कारभाष्योपेता श्वेताश्वतरोपनिषत् पुटसङ्ख्या, उत्तमूर् वीरराघवाचार्य ट्रस्ट्, चेन्नै

सु.उ. - सुबालोपनिषत्

ग्रन्थसूची

१. ब्रह्मसूत्रश्रीभाष्यम्, श्री नृसिंहप्रिया ट्रस्ट्, चेन्नै, सम्पादक: डा.का.ई.देवनाथाचार्य:, २००६

२. वेदार्थसङ्ग्रह:, तात्पर्यदीपिकाव्याख्योपेत:, श्रीमच्चन्नपुरी श्रीसरस्वतीभण्डारसभिकै: तेलुगुलिप्यां मुद्रापित:, गुरुपरम्पराब्देषु ४९८४ तमे स्वभानुनाम संवत्सरे

३. तत्त्वमुक्ताकलाप: व्याख्यात्रयोपेत:, सम्पादक: डा.ना.रा.श्रीकृष्णताताचार्य:, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वारणासी (श्रीमद्वेङ्कटनाथकृतया स्वोपज्ञसर्वार्थसिद्धिव्याख्यया, नृसिंहदेवकृतया आनन्ददायिनीव्याख्यया, देवनाथताताचार्यकृतया अक्षरार्थव्याख्यया च संवलित:), १९९६

४. उपनिषद्भाष्यम् श्रीरङ्गरामानुजमुनिवरविरचितं केन – कठ – प्रश्न – मुण्डक – माण्डूक्य - श्वेताश्वतर – अथर्वशिखा – कौषीतकि – मन्त्रिका – अग्निरहस्य भाष्यम्, श्रीश्रुतप्रकाशिकाचार्य-श्रीसुदर्शनसूरिप्रणीतं सुबालोपनिषद्भाष्यम्, श्रीमदभिनवदेशिक उत्तमूर् वात्स्य श्रीवीरराघवाचार्यमहादेशिकै: परिष्कृतं च, श्री उत्तमूर् वीरराघवाचा सेन्टिनरि ट्रस्ट्, चेन्नै, २००३

५. उपनिषद्भाष्यम् श्रीरङ्गरामानुजमुनिवरविरचितं तैत्तिरीय – ऐतरेय – छान्दोग्योपनिषद्भाष्यम्, श्री उत्तमूर् वीरराघवार्यमहादेशिक प्रणीत परिष्कार-उपनिषदर्थसङ्ग्रहकारिकासहितम्, श्री उत्तमूर् वीरराघवाचा सेन्टिनरि ट्रस्ट्, चेन्नै, २००४

६. तत्त्वमुक्ताकलापः सर्वङ्कषाव्याख्यासहिता, व्याख्याता महामहोपाध्यायेत्यादि बिरुदाङ्कितः नव्यमङ्गलाभिजनः वरदाचार्यः, आर्षग्रन्थप्रकाशनम्, पम्पापतिवीथी, जयनगरम्, मैसूरु, २००४

७. तत्त्वमुक्ताकलापः, श्रीपण्डितरत्नं कोत्तमङ्गलं वरदाचार्यविरचित सुबोधिनी व्याख्यासहिता, कन्नडलिप्याम्, श्रीब्रह्मतन्त्रपरकालमठम्, मैसूरु, १९७९

८. श्रीन्यायसिद्धाञ्जनम्, श्रीरङ्गरामानुजमुनिवरविरचितव्याख्यासहितम्, महामहोपाध्याय कपिस्थलं देशिकाचार्यैः परिशोधितं, श्रीवैष्णवसिद्धान्तप्रचारसभाध्यक्षैः प्रकाशितम्, मद्रास्, १९३४

९. श्रीनिगमान्तमहादेशिकैरनुगृहीता अधिकरणसारावलिः, कुमारवरदाचार्यानुगृहीतेन चिन्तामणिव्याख्यानसहिता, श्रीवण्शठकोपश्रीशठकोपरामानुजयतीन्द्रमहादेशिकानुगृहीतया पदयोजनया सहिताच, कुरुचि. लक्ष्मीनृसिम्हाचार्येण प्रकाशिता, मद्रास्, १९४०

१०. श्रीभाष्यम्, श्रीसुदर्शनसूरिप्रणीतया श्रुतप्रकाशिकया, श्रीमदभिनवरङ्गनाथब्रह्मतन्त्रपरकालसंयमीन्द्रप्रणीत-श्रीभाष्यसूक्तिगूढार्थसङ्ग्रहेण च हितम्, श्रीमद्वेदान्तदेशिकविहारसभया मुद्रापितः, मैसूरु, १९७०

११. उपादानत्वविचारः, श्रीनृसिंहतातयार्यमहादेशिकैः अनुगृहीतः, तदातैः अनुगृहीता आश्रयानुपपत्तिश्च, चेन्नै, २००८

१२. वेदार्थसङ्ग्रहः, संस्कृत-संशोधन-संसत्, यादवाद्रि (मेलुकोटे), १९९१

१३. डा. मल्लोपाध्यायैः रचितः 'ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ'

१४. डा. पि. रामानुजन् महोदयानां लेखनं - 'विशिष्टाद्वैतशास्त्रे ब्रह्मणो अभिन्ननिमित्तोपादानत्वम्'

ಡಾ. ಎನ್. ಎಸ್. ಅನನ್ತರङ्गाचार्यैः विरचिता ग्रन्थाः

'The philosophy of Sadhana in Vishishtadvaita'

'Ramanuja on the chatussutri'

Vishishtadvaitic Epistemology and Concept of Matter

ಶ್ರೀಭಾಷ್ಯ 1,2,3 (ಕನ್ನಡಾನುವಾದ ವಿವರಣೆಗಳೊಡನೆ)

ಅಧಿಕರಣ ಸಾರಾವಲಿ: - ೧ , ೨ – ಕನ್ನಡಾನುವಾದ ವಿವರಣೆಗಳೊಡನೆ

ರಾಮಾನುಜ ದರ್ಶನ ಮತ್ತು ಯತೀಂದ್ರ ಮತ ದೀಪಿಕಾ

ರಾಮಾನುಜ ಸೂಕ್ತಿ ಮುಕ್ತಾವಳೀ

ಶ್ರೀಭಾಷ್ಯ ಉಪನ್ಯಾಸ ಮಂಜರೀ

Principal upanishads Vol I, II, III (english translation of Isa, katha, kena, prashna, mundaka, mandukya, taittiriya, shvetashvatara, chandogya, bruhadaranyaka upanishads with explanations from Sri Rangaramanujamuni's commentaries)

ब्रह्मणो अभिन्ननिमित्तोपादानत्वप्रतिपादने उपात्तानि प्रमुखश्रुतिस्मृतिप्रमाणानि

अपहतपाप्मा विजरो विमृत्यु: विशोक: विजिघत्स: अपिपास: सत्यकाम: सत्यसङ्कल्प: । (छा.उ.८-१-५)

अखिलहेयप्रत्यनीक: जरामृत्युरहित: बुभुक्षावर्जित: पिपासाविदूर: सकलकल्याणगुणाकर: सत्यसङ्कल्प: दहराकाश: परमात्मा इति ।

उत तमादेशमप्राक्ष्यो येन अश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति । (छा.उ.६-१-३)

अत्र आदेशशब्दस्य प्रशासनमित्यर्थ: । उत तमादेशं तमादेष्टारं प्रशासितारम् अप्राक्ष्य: किं पृष्टवानित्यर्थ: । येन श्रुतेन अश्रुतं सर्वं तत्कार्यमिति स्वरूपेण श्रुतं भवति । अमतं मतमविज्ञातं विज्ञातं भवति । विज्ञान शब्द: निदिध्यासनपर: 'श्रोतव्यो मन्तव्यो निदिध्यासितव्य:' इतिश्रुतेरैकार्थ्यात् ।

कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति । (मु.उ.१-१-३)

हे भगव:! कस्मिन्नेव वस्तुनि विज्ञाते सर्वमिदं कार्यजातं विज्ञातं भवति । सर्वनिमित्तोपादानभूतं वस्तु किमिति फलितोर्थ: ।

काल: स्वभावो नियतिर्यदृच्छा भूतानि योनि: पुरुष इति चिन्त्यम् ।

संयोग एषां न त्वाऽत्मभावात् आत्माऽप्यनीश: सुखदु:खहेतो: ।। (श्वे.उ.१-२)

काल: स्वभाव: नियतिलक्षणं कर्म अहेतुकलक्षणं यदृच्छा पञ्चभूतानि योनि: प्रकृति: पुरुषश्च इत्यादीनि

जगत्कारणमित्येतत् न चिन्त्यम् न निर्णेतुं शक्यम् । यदि चेतनाचेतनानां संयोगो हेतुर्भवितुमर्हति इत्यपि न युक्तिसहम् यतो हि आत्मन: सुखदु:खानुभवहेतो: न नियन्तृत्वं सम्भवति इति आत्माऽपि अनीश: । यदि आत्मा नियन्ता तर्हि सुखमेवानुभवति दु:खानुभवस्य अनिष्टत्वात् । आत्मसद्भावादपि संयोगो भवति इत्येतत् न एव इत्यर्थ: ।

किं कारणं ब्रह्म कुत: स्म जाता: जीवाम केन क्व च सम्प्रतिष्ठा: ।

अधिष्ठिता केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ।। (श्वे.उ.१-१)

जगत्कारणं ब्रह्म किं देवतारूपम् ? कस्मात् ब्रह्मणो वयं जाता: कस्मादेव अस्माकं स्थिति: लयश्च । केन अधिष्ठिता: तत्परतन्त्रास्सन्त: दु:खरूपेषु जन्मसु विशिष्टामवस्थितिमनुसृत्य वर्तामहे ।(श्वे. उ. भा. पु. ३४५)

किं स्विद्वनं क उ स वृक्ष आसीत् । यतो द्यावापृथिवी निष्टतक्षु: । मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठत् भुवनानि धारयन् । (कृ.य.ब्रा.२-८-७)

किं वनम् अधिकरणम् आसीत् ? स: कुत्र स्थित: ? क: एव वृक्ष: उपादानं च आसीत् ? यत एव द्यावापृथिव्यादयो सृष्टा: ? मनीषिणो सावधानेन पृच्छत यत् भुवनानि अन्तर्यामित्वेन धारयन् अध्यतिष्ठत् इति । अत्र श्रुत्या निमित्तत्वं सिद्धवत्कृत्य उपादानसहकारिकारणयोरेव प्रश्न इत्याचार्या: ।

गौरनाद्यन्तवती सा जनित्री भूतभाविनी । (मन्त्रिक.उ.१)

ब्रह्मात्मिका प्रकृतिराद्यन्तरहिता समष्टिजनित्री व्यष्टिहेतुश्च ।

यद्भूतयोनिं परिपश्यन्ति धीराः । (मु.उ.१-१-६)

प्रज्ञाशालिनः तत् सर्वभूतोपादानतया पश्यन्ति ।

तमः परेदेवे एकी भवति । (सु.उ.२)

नामरूपविभागानर्हातिसूक्ष्मदशापन्नं सर्वं चिदचिदात्मकं ब्रह्मणि एकी भवति अविभागेन वर्तते ।

तदात्मानं स्वयमकुरुत । (तै.उ.२-७)

अविभक्तनामरूप आत्मा स्वात्मानं स्वयमेव विभक्तनामरूपम् आत्मानमकुरुत ।

तत्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्चत्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । (तै.उ.२-६)

ब्रह्मैव इदं सर्वं सृष्ट्वा तदन्तर्यामितया स्थितं चेतनाचेतननामरूपभाक् अभवत् । सच्छब्दवाच्यो विकाररहितः चेतनः त्यच्छब्दवाच्यं विकारास्पदमचेतनं च अभवत् । निरुक्तं जातिगुणाद्याश्रयमचेतनम् अनिरुक्तं जातिगुणादिरहितं चेतनम् । अचेतनस्याधारं चेतनं निलयनम् आश्रितमचेतनम् अनिलयनम् । जड्स्वरूपम् अविज्ञानमजडस्वरूपं विज्ञानम् । सत्यञ्चानृतं च अन्तर्यामितया चेतनाचेतनानाम् अन्तः स्थितः सन् चेतनाचेतनवाच्यसर्वशब्दवाच्यो भूत्वाऽपि सत्यमभवत् स्वस्वभावमजहन्निर्विकारोऽभवत् ।

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । (श्वे.उ.६-१९)

निष्कलं निरवयवं निष्क्रियं कृतकृत्यं शान्तं अशनायाद्यूर्मिषड्करहितं निरवद्यम् अवद्यरहितं निरञ्जनं सङ्गरहितम् ।

पुरुषं ब्रह्मयोनिम् । (मु.उ.३-१-३)

पुरुषशब्दनिर्दिष्टं वासुदेवं जगदुपादानभूतं ब्रह्म यदा ब्रह्मदर्शी पश्यति तदा परमसाम्यमुपैति । अत्र ब्रह्मयोनिशब्दयो: सामानाधिकरण्यमिति व्यासार्या: ।

पुरुषं प्रकृतिं चैव विद्ध्यनादी उभावपि । (भ.गी.१३-१९)

पुरुषशब्दितजीवात्मान: प्रकृतिश्च तौ उभावपि अनादी इति जानीहि ।

ब्रह्म वनं ब्रह्म स वृक्ष आसीत् । यतो द्यावापृथिवी निष्टतक्षु: । मनीषिणो मनसा विब्रवीमि व: । ब्रह्माध्यतिष्ठद्भुवनानि धारयन् । (कृ.य.ब्रा.२-८-८)

ब्रह्म वनम् अधिकरणम् आसीत् । ब्रह्मैव वृक्ष:, उपादानं च आसीत् । यत एव द्यावापृथिव्यादयो सृष्टा: । मनीषिणो सावधानेन श्रुणुत ब्रह्मैव भुवनानि अन्तर्यामित्वेन धारयन् अध्यतिष्ठत् इति ।

यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । (छा.उ.६-१-४)

सोम्य! यथा एकेन उपादानभूतेन मृत्पिण्डज्ञानेन सर्वं तत्कार्यजातं मृदात्मकमेवेति विज्ञातं स्यात् । वाचा आलभ्यते आरभ्यते स्पृश्यत इति वाचारम्भणम् । विकारो अवस्थान्तरापत्ति: । मृदेव घटशरावादि नाना अवस्थापन्नं नाना नामधेयानि भजदपि सर्वं मृदात्मकमेवेति मृत्तिकेत्येव सत्यम् इति ।

यथोर्णनाभि: सृजते गृण्हते च यथा पृथिव्यां ओषधय: सम्भवन्ति ।

यथा सत: पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम् ।। (मु.उ.१-१-८)

यथा लूताख्यकीटविशेष: स्वयम् उपादानं निमित्तं च भूत्वा तन्तुजालं सृजते उपसम्हरति च; यथा अचेतनात् पृथिव्या ओषध्याद्युपादानत्वम्; यथा च पुरुषस्य चेतनस्य जीवत एव अचेतनानां केशलोमाद्युपादानत्वम्; तथैव अक्षरात् निर्विकारात् ब्रह्मण: स्वयम् उपादाननिमित्तभूतात् इदं सर्वं विश्वं सम्भवति ।

य: पृथिव्यां तिष्ठन् पृथिव्या अन्तर: यं पृथिवी न वेद यस्य पृथिवी शरीरं य: पृथिवीमन्तरो यमयति स ते आत्मा अन्तर्याम्यमृत: । (बृ.उ.३-७-३)

य: पृथिव्यां स्थित: पृथिव्यन्तर्गतो अन्तरात्मतया अवस्थितमपि यं पृथिवी न वेदितुं शक्नोति य: पृथिव्या: नियन्ता स ते आत्मा अन्तर्यामी दोषरहित: ।

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसम्विशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म । (तै.उ.३-२)

यत एव इमानि ब्रह्मादिस्तम्बपर्यन्तानि सर्वाणि भूतानि उत्पद्यन्ते, यदात्मभूतेन जीवन्ति, यदा प्रयन्ति तदा यत् संविशन्ति एकीकृततया प्रविशन्ति लीयन्ते तदेव विजानीहि तद्ब्रह्म ।

सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम् । तदैक्षत बहुस्यां प्रजायेयेति । तत्तेजोऽसृजत । (छा.उ.६-२-१)

इदं सर्वम् अग्रे सृष्टे: पूर्वं सदेव एकमेव आसीत् अद्वितीयम् अधिष्ठात्रन्तररहितमासीत् । तत् सच्छब्दवाच्यं ब्रह्म ऐक्षत सङ्कल्पयत् अहं बहुस्यां तदर्थं प्रजायेय इति । तत् तेजोऽसृजत ।

सन्मूला: सोम्येमा: सर्वा: प्रजा: सदायतना: सत्प्रतिष्ठा: । (छा.उ.६-८-४)

सोम्य! इमा: सर्वा: प्रजा: सच्छब्दवाच्यब्रह्मण एव उत्पन्ना: तदाधारा: प्रलये सच्छब्दवाच्यब्रह्मणि एव प्रतिष्ठा: नामरूपविभागानर्हसूक्ष्मरूपेणावस्थिता: ।

पदार्थकोष:

आत्मा – सर्वं नियन्तृतया आधारतया शेषितया आप्नोतीति आत्मा

अकृताभ्यागम: - अकृतस्य कर्मणो फलानुभवसम्भव:

अपृथक्सिद्धम् – यस्य उत्पत्तिविनाशापक्षयसत्तादिकम् आश्रयोत्पत्त्यादिनैव व्यवह्रियते तत् तदपृथक्सिद्धम्

अव्याकृतम् – नामरूपविभागानर्हावस्था अथवा सूक्ष्मचिदचिद्विशिष्टं ब्रह्म

अवस्था – आगन्तुको अपृथक्सिद्धधर्म:

उपादानत्वम् – अभिन्नसत्ताककारणत्वलक्षणम् अपृथक्सिद्धकारणत्वम् अथवा भाव्यवस्थाविशेषवत: प्रागवस्थायोग:

कार्यम् – कारणस्य अवस्थान्तरापत्ति:

कृतविप्रणाश: - कृतस्य कर्मणो फलानुभवविरह:

ब्रह्म – स्वरूपतो गुणतश्च बृहत्त्वं यस्य तत् ब्रह्मशब्देनाभिधीयते

शरीर-शरीरिभाव: - सर्वात्माना आधारतया नियन्तृतया शेषितया आप्नोतीति आत्मा; सर्वात्मना आधेयतया नियाम्यतया शेषतया च अपृथक्सिद्धं प्रकारभूतं शरीरम् । अथवा यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे धारयितुं शक्यं तच्छेषतैकस्वरूपञ्च तत्तस्य शरीरम्; इतर: शरीरी । अथवा व्याप्यत्वे सति सर्वात्मना स्वार्थे धारयितुं शक्यं शरीरम्; व्याप्तत्वे सति यावद्द्रव्यभावितया स्वार्थे धारयितुं शक्त आत्मा ।

सत् – सूक्ष्मचिदचिद्विशिष्टं कालनित्यविभूत्यादिसकलनित्यवस्तुविशिष्टं ब्रह्म

सत्, ईश्वरः, परमात्मा, ब्रह्म, आत्मा, आकाशः - एते सामान्यशब्दा: श्रीमन्नारायणे देवताविशेषे पर्यवस्यन्ति इति सुबालोपनिषत्-तैत्तिरीयोपनिषदित्यादिषु श्रूयन्ते ।

स्वरूपम् – यं विना यन्नोपपद्यते तत्तस्य स्वरूपम्